This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M-2518 विषय E

नांव पवमान पंच सूक्त

लेखक/लिपीकार

पृष्ठ 67

काळ पूर्ण/अपूर्ण पूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।अथ पवमानपंचसूक्त प्रा०।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥ १ ॥

॥ श्रीगणेशायनमः ॥ यस्यवाक्यंसऋषिर्यातेनोच्यतेसादेवतायेद
क्षरपरिमाणंतच्छंदःश्रीपरमेश्वरप्रीत्यर्थंपौरुषंपावमानंचनतमंहोइ
तीतिच ॥ अस्यवामीयसूक्तंचपंचसूक्तान्यनुक्रमात् ॥ एतत्पंच
सूक्तपठनंकरिष्ये ॥ हरिः ॐ ॥ सहस्रशीर्षापुरुषःसहस्राक्षः
सहस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ पुरुषएवेदं
सर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ ए
तावानस्यमहिमातोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपा
दस्यामृतंदिवि ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ त
तोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्माद्विराळजायतवि
राजोअधिपूरुषः ॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥१॥

मान.

॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ वसंतो अस्यासीदाज्यं ग्रीष्म इ
ध्मः शरद्धविः ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा
अयजंत साध्या ऋषयश्च ये ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं॥
पशूंतांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ तस्माद्यज्ञात्सर्वहुत ऋ
चः सामानि जज्ञिरे ॥ छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥
तस्मादश्वा अजायंत ये के चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्मा
ज्जाता अजावयः ॥ २ ॥ यत्पुरुषं व्यदधुः कति धा व्यकल्पयन्॥
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ब्राह्मणोऽस्य मुखमासी
द्बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत ॥ मुखादिंद्रश्चाग्निश्च प्राणा
द्वायुरजायत ॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत ॥ प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकल्पयन् ॥ सप्तास्यासन्परिध
यस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंप
शुं ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेह
नाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ३ ॥ इतिपुरुष
सूक्तंसंपूर्णं ॥ ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥
हरिः ॐम् ॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥ इंद्रायपा
तवेसुतः ॥ रक्षोहाविश्वचर्षणिरभियोनिमयोहतं ॥ द्रुणासधस्थ
मासदत् ॥ वरिवोधातमोभवमंहिष्ठोवृत्रहन्तमः ॥ पर्षिराधोम
घोनां ॥ अभ्यर्षमहानांदेवानांवीतिमंधसा ॥ अभिवाजमुतश्रवः
॥ त्वामच्छाचरामसितदिदर्थादिवेदिवे ॥ इंदोत्वेनऽआशसः॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता ॥ वारेणशश्वतातन ॥ तमी
मण्वीःसमर्यऽआगृभ्णंतियोषणोदशे ॥ स्वसारःपार्यादिवि ॥
तमींहिन्वंत्यग्रुवोधमंतिबाकुरंदृतिं ॥ त्रिधातुवारणंमधु ॥ अभी
३ ममद्न्याऽउतश्रीणंतिधेनवःशिशुं ॥ सोममिंद्रायपातवे ॥
अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजिघ्नते ॥ शूरोमघाचमंहते ॥२॥
पवस्वदेववीरतिपवित्रंसोमरंह्या ॥ इंद्रमिंदोवृषाविश ॥ आव
च्यस्वमहिप्सरोवृषेंदोद्युम्नवत्तमः ॥ आयोनिंधर्णसिःसदः ॥ अ
धुक्षतप्रियंमधुधारासुतस्यवेधसः ॥ अपोवसिष्टसुक्रतुः ॥ महां
तंत्वामहीरन्वापोऽअर्षंतिसिंधवः ॥ यद्गोभिर्वासयिष्यसे ॥ समु
द्रोऽअप्सुमामृजेविष्टंभोधरुणोदिवः ॥ सोमःपवित्रेऽअस्मयुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्र.

॥ ३ ॥

॥ ३ ॥ अचिक्रदद्वृषाहरिर्महान्मित्रोनदर्शतः ॥ संसूर्येणरोचते ॥ गिरस्तऽइंदऽओजसाममृज्यंतेऽअपस्युवः ॥ याभिर्मदायशुंभसे ॥ तंत्वामदायघृष्वयऽउलोककृत्नुमीमहे ॥ तवप्रशस्तयोमहीः ॥ अस्मभ्यमिंदविंद्रयुर्मध्वःपवस्वधारया ॥ पर्जन्योवृष्टिमाँऽइव ॥ गोषाऽइंदोनृषाऽअस्यश्वसावाजसाउत ॥ आत्मायज्ञस्यपूर्व्यः ॥ ४ ॥ एषदेवोऽअमर्त्यः पर्णवीरिवदीयति ॥ अभिद्रोणान्यासदं ॥ एषदेवोविपाकृतोतिव्हरांसिधावति ॥ पवमानोऽअदाभ्यः ॥ एषदेवोविपन्युभिः पवमानऽऋतायुभिः ॥ हरिर्वाजायमृज्यते ॥ एषविश्वानिवार्याशूरोयन्निवसत्वभिः ॥ पवमानःसिषासति ॥ एषदेवोरथर्यतिपवं

मान.

॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानोदशस्यति ॥ आविष्कृणोतिवग्वनुं ॥ ५ ॥ एषत्रिभिरभिष्टु
तोपोदेवोविगाहते ॥ दधद्रत्नानिदाशुषे ॥ एषदिवंविधावतिति
रोरजांसिधारया ॥ पवमानःकनिक्रदत् ॥ एषदिवंव्यासरत्ति
रोरजांस्यस्पृतः ॥ पवमानःस्वध्वरः ॥ एषप्रत्नेनजन्मनादेवो
देवेभ्यःसुतः ॥ हरिःपवित्रेऽअर्षति ॥ एषउस्यपुरुव्रतोजज्ञानो
जनयन्निषः ॥ धारयापवतेसुतः ॥ ६ ॥ सनाचसोमजेषिचपव
मानमहिश्रवः ॥ अथानोवस्यसस्कृधि ॥ सनाज्योतिःसनास्व
१र्विश्वाचसोमसौभगा ॥ अथानोवस्यसस्कृधि ॥ सनादक्षमुत
क्रतुमपसोममृधोजहि ॥ अथानोवस्यसस्कृधि ॥ पवीतारःपुनी
तनसोममिंद्रायपातवे ॥ अथानोवस्यसस्कृधि ॥ त्वंसूर्यनऽआ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥ ४ ॥

भंजतवक्रत्वातवोतिभिः ॥ अथानोवस्यसस्कृधि ॥ ७ ॥ तव
क्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यं ॥ अथानोवस्यसस्कृधि ॥ अ
भ्यर्षस्वायुधसोमद्विबर्हसंरयिं ॥ अथानोवस्यसस्कृधि ॥ अभ्य
र्षानपच्युतोरयिंसमत्सुसासहिः ॥ अथानोवस्यसस्कृधि ॥ त्वां
यज्ञैरवीवृधन्पवमानविधर्मणि ॥ अथानोवस्यसस्कृधि ॥ रयिं
नश्चित्रमश्विनमिंदोविश्वायुमाभर ॥ अथानोवस्यसस्कृधि ॥ ८ ॥
समिद्धोविश्वतस्पतिःपवमानोविराजति ॥ प्रीणन्वृषाकनिक्रदत्
॥ तनूनपात्पवमानःशृंगेशिशानोऽअर्षति ॥ अंतरिक्षेणरारजत्
॥ ईळेन्यःपवमानोरयिर्विराजतिद्युमान् ॥ मधोर्धाराभिरोजसा
बर्हिःप्राचीनमोजसापवमानस्तृणन्हरिः ॥ देवेषुदेवऽईयते ॥

मान.

॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदातिर्जिहतेबृहद्द्वारोदेवीर्हिरण्ययीः ॥ पवमानेनसुष्टुताः ॥ ९ ॥
सुशिल्पेबृहतीमहीपवमानोवृषण्यति ॥ नक्तोषासानदर्शते ॥ उ
भादेवानृचक्षसाहोतारादैव्याहुवे ॥ पवमानऽइंद्रोवृषा ॥ भारती
पवमानस्यसरस्वतीळामही ॥ इमन्नोयज्ञमागमन्तिस्रोदेवीःसुपे
शसः ॥ त्वष्टारमग्रजांगोपांपुरोयावानमाहुवे ॥ इंदुरिंद्रोवृषाह
रिःपवमानःप्रजापतिः ॥ वनस्पतिंपवमानमध्वासमङ्ग्धिधारया॥
सहस्रवल्शंहरितंभ्राजमानंहिरण्ययं ॥ विश्वेदेवाःस्वाहाकृतिंपव
मानःस्यागत ॥ वायुर्बृहस्पतिःसूर्योग्निरिंद्रःसजोषसः ॥ १० ॥
मंद्रयासोमधारयावृषापवस्वदेवयुः ॥ अव्योवारेकवस्मयुः ॥
अभित्यंमद्यंमदमिंदविंद्रऽइतिक्षर ॥ अभिवाजिनोऽअर्वतः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव. ॥ ५ ॥

अभित्यंपूर्व्यमदंसुवानोऽअर्षपवित्रऽआ ॥ आभिवाजंमुतश्रवः ॥
॥ अनुद्रप्सासइंऽदवऽआपोनप्रवतासरन् ॥ पुनानाऽइंद्रे
माशत ॥ यमत्यमिववाजिनंमृजंतियोषणोदशं ॥ वनेक्रीळंतम
त्यविं ॥ ११ ॥ तंगोभिर्वृषणंरसंमदायदेववीतये ॥ सुतंभरायसं
सृज ॥ देवोदेवायधारयेंद्रायपवतेसुतः ॥ पयोयदस्यपीपयत् ॥
आत्मायज्ञस्यरंह्यासुष्वाणःपवतेसुतः ॥ प्रत्नंनिपातिकाव्यं ॥ एवा
पुनानऽइंद्रयुर्मदंमदिष्ठवीतये ॥ गुहाचिद्दधिषेगिरः ॥ १२ ॥ अ
सृग्रमिंदवःपथाधर्मन्नृतस्यसुश्रियः ॥ विदानाऽअस्ययोजनं ॥
प्रधारामध्वोऽअग्रियोमहीरपोविगाहते ॥ हविर्हविष्षुवंद्यः ॥

मान. ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयुजोवाचोऽअग्रियोवृषावचक्रदद्वने ॥ सद्माभिसत्योऽअध्वरः॥
परियत्काव्याकविर्नृम्णावसानोऽअर्षति ॥ स्वर्वाजीसिषासति ॥
पवमानोऽअभिस्पृधोविशोराजेवसीदति ॥ यदीमृण्वंतिवेधसः
॥१३॥ अव्योवारेपरिप्रियोहरिर्वनेषुसीदति ॥ रेभोवनुष्यतेमती ॥
सवायुमिंद्रमश्विनासाकंमदेनगछति ॥ रणायोऽअस्यधर्मभिः ॥
आमित्रावरुणाभगंमध्वःपवंतऽऊर्मयः ॥ विदानाऽअस्यशक्म
भिः ॥ अस्मभ्यंरोदसीरयिंमध्वोवाजस्यसातये ॥ श्रवोवसूनिसं
जितं ॥ १४ ॥ एतेसोमाऽअभिप्रियमिंद्रस्यकाममक्षरन् ॥ वर्धं
तोऽअस्यवीर्यं ॥ पुनानासश्चमूषदोगछंतोवायुमाश्विना ॥
तेनोधांतुसुवीर्यं ॥ इंद्रस्यसोमराधसेपुनानोहार्दिचोदय ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव. ॥ ६ ॥

ऋतस्ययोनिमासदं ॥ मृजंतित्वादशक्षिपोहिन्वंतिसप्तधीत
यः ॥ अनुविप्राऽअमादिषुः ॥ देवेभ्यस्त्वामदायकंसे
जानमतिमेष्यः ॥ संगोभिर्वासयामसि ॥ १५ ॥ पुना
नःकलशेष्वावस्त्राण्यरुषोहरिः ॥ परिगव्यान्यव्यत ॥ मघोन
ऽआपवस्वनोजहिविश्वाऽअपाद्विषः ॥ इंदोसखायमाविश ॥ वृ
ष्टिंदिवःपरिस्रवद्युम्नंपृथिव्याऽअधि ॥ सहोनःसोमपृत्सुधाः ॥
नृचक्षसंत्वावयामिंद्रपीतंस्वर्विदं ॥ भक्षीमहिप्रजामिषं ॥ १६ ॥
परिप्रियादिवःकविर्वयांसिनप्रयोहितः ॥ सुवानोयातिकाविक्रतुः ॥
प्रप्रक्षयायपन्यसेजनायजुष्टोऽअद्रुहे ॥ वीत्यर्षचनिष्ठया ॥ ससूनुर्मा

मान. ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तराशुचिर्जातोर्जातेऽअरोचयत् ॥ महान्महीऽऋतावृधा ॥ ससम
धीतिभिर्हितोनद्योऽआजिन्वदद्रुहः ॥ याऽएकमक्षिवावृधुः ॥ ताऽ
अभिसंतमस्तृतंमहेयुवानमादधुः ॥ इंदुमिंद्रतवव्रते ॥ १७ ॥ अ
भिवन्हिरमर्त्यःसप्तपश्यतिवावहिः ॥ क्रिविर्देवीरतर्पयत् ॥ अवा
कल्पेषुनःपुमः स्तमांसिसोमयोध्या ॥ तानिपुनानजंघनः ॥ नून
व्यसेनवीयसेसूक्तायसाधयापथः ॥ प्रत्नवद्रोचयारुचः ॥ पवमा
नमहिश्रवोगामश्वंरासिवीरवत् ॥ सनामेधांसनास्वः ॥ १८ ॥
प्रस्वानासोरथाऽइवार्वंतोनश्रवस्यवः ॥ सोमासोराय्येऽअक्रमुः ॥
हिन्वानासोरथाऽइवदधान्विरेगभस्त्योः ॥ भरासःकारिणामिव ॥
राजानोनप्रशस्तिभिःसोमासोगोभिरंजते ॥ यज्ञोनसप्रधातृभिः ॥
परिसुवानासऽइंदवोमदायबर्हणागिरा ॥ सुताऽअर्षंतिधारया ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आपानासोविवस्वतोजनंतऽउषसोभगं ॥ सूराऽअण्वंवितन्वते
॥ १९ ॥ अपद्वारामतीनांप्रत्नाऽऋण्वंतिकारवः ॥ वृष्णोहरसऽ
आयवः ॥ समीचीनासऽआसतेहोतारःसप्तजामयः ॥ पदमेक
स्यपिप्रतः ॥ नाभानाभिंनऽआददेचक्षुश्चित्सूर्यसचा ॥ कवेरपत्य
मादुहे ॥ अभिप्रियादिवस्पदमध्वर्युभिर्गुहाहितं ॥ सूरेःपश्यति
चक्षसा ॥ २० ॥ उपास्मैगायतानरःपवमानायेंदवे ॥ अभिदे
वाँऽइयक्षते ॥ अभितेमधुनापयोथर्वाणोऽअशिश्रयुः ॥ देवंदेवा
यंदेवयु ॥ सनःपवस्वशंगवेशंजनायशमर्वते ॥ शंराजन्नोषधीभ्यः
॥ बभ्रवेनुस्वर्तवसेरुणायदिविस्पृशे ॥ सोमायगाथमर्चत ॥ इस्त
च्युतेभिरद्रिभिःसुतंसोमंपुनीतन ॥ मधावाधावतामधु ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमसेदुपसीदतदध्नेदभिश्रीणीतन ॥ इंदुमिंद्रेदधातन ॥ अमित्र
हाविचर्षणिःपवस्वसोमशंगवे ॥ देवेभ्योऽअनुकामकृत् ॥ इंद्रा
यसोमपातवेमदायपरिषिच्यसे ॥ मनश्चिन्मनसस्पतिः ॥ पव
मानसुवीर्यरयिंसोमरिरीहिनः ॥ इंदविंद्रेणनोयुजा ॥ २२ ॥
सोमाऽअसृग्रमिंदवःसुताऽऋतस्यसादने ॥ इंद्रायमधुमत्तमाः ॥
अभिविप्राऽअनूषतगावोवत्संनमातरः ॥ इंद्रंसोमस्यपीतये ॥
मदच्युत्क्षेतिसादनेसिंधोरूर्माविपश्चित् ॥ सोमोगौरीऽअधिश्रितः
॥ दिवोनाभाविचक्षणोव्योवारेमहीयते ॥ सोमोयःसुक्रतुःकविः
॥ यःसोमःकलशेष्वाँऽअंतःपवित्रऽआहितः ॥ तमिंदुःपरिषस्वजे
॥ २३ ॥ प्रवाचमिंदुरिष्यतिसमुद्रस्याधिविष्टपि ॥ जिन्वन्को

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥ ८ ॥

शंमधुश्चुतं ॥ नित्यस्तोत्रोवनस्पतिर्धीनामंतःसबर्दुघः ॥ हिन्वा
नोमानुषायुगा ॥ अभिप्रियादिवस्पदासोमोहिन्वानोऽअर्षति ॥
विप्रस्यधारयाकविः ॥ आपवमानधारयरयिंसहस्रवर्चसं ॥
अस्मेऽइंदोस्वाभुवं ॥ २४ ॥ ओंऋचोऽअक्षरेपरमेव्योमन्य
स्मिन्देवाऽआधिविश्वेनिषेदुः ॥ यस्तंनवेदकिमृचाकरिष्यतियऽइ
त्तद्विदुस्तऽइमेसमासते ॥ इतिपवमानप्रथमोध्यायः ॥ हरिः
ॐ ॥ सोमःपुनानोऽअर्षतिसहस्रधारोऽअत्यविः ॥ वायोरिंद्रस्य
निष्कृतं ॥ पवमानमवस्यवोविप्रमभिप्रगायत ॥ सुष्वाणंदेववी
तये ॥ पवंतेवाजसातयेसोमःसहस्रपाजसः ॥ गृणानादेववी
तये ॥ उतनोवाजसातयेपवस्वबृहतीरिषः ॥ द्युमदिंदोसुवीर्य

मान.

॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ तेनः सहस्रिणं रयिं पवंता मा सुवीर्यं ॥ सुवाना देवास ऽइंदवः
॥ १ ॥ अत्या हियाना नहेतृभिरसृग्रं वाजसातये ॥ विवारमव्य
माशवः ॥ वाश्रा ऽअर्षंती दैवोभि वत्सं न धेनवः ॥ दधन्विरे गर्भस्त्योः
॥ जुष्ट ऽइंद्राय मत्सरः पवमान कनिक्रदत् ॥ विश्वा ऽअप द्विषो
जहि ॥ अपघ्नंतो ऽअराव्णः पवमानास्त्वर्दृशः ॥ योनावृतस्य सीदता ॥
परि प्रासिष्यदत्क विः सिंधोरूर्मावधि श्रितः ॥ कारं बिभ्रत्पुरुस्पृहं
॥ गिरा यदी सबंधवः पंचन्नाता ऽअपस्यवः ॥ परि ष्कृण्वंति धर्ण
सिं ॥ आदस्य शुष्मिणो रसे विश्वे देवा ऽअमत्सत ॥ यदी गोभिर्व
सायते ॥ निरिणानो विधावति जहच्छर्याणि तान्वा ॥ अत्रा संजिघ्र
ते युज ॥ नप्तीभिर्योविवस्वतः शुभ्रो न मामृजे युवा ॥ गाः कृण्वानो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥ ९ ॥

ननिर्णिजं ॥ ३ ॥ अतिश्रितीतिरश्वतागव्याजिगात्यण्व्या ॥ वसु
मियर्तियंत्रिदे ॥ अभिक्षिपःसमग्मतमर्जयंतीरिषस्पतिं ॥ पृष्ठा
गृभ्णतवाजिनः ॥ परिदिव्यानिमर्भृशद्विश्वानिसोमपार्थिवा ॥
वस्नूनियाह्यस्मयुः ॥ ४ ॥ एषधियायात्यण्व्याशूरोरथेभिराशु
भिः ॥ गच्छन्निंद्रस्यनिस्कृतं ॥ एषपुरूधियायतेबृहतेदेवतातये ॥
यत्रामृतासआसते ॥ एषहितोविनीयतेतःशुभ्रावतापथा ॥ यदी
तुंजंतिभूर्णयः ॥ एषश्रृंगाणिदोधुवच्छिशीतेयूथ्योवृषा ॥ नृम्णा
दधानऽओजसा ॥ एषरुक्मिभिरीयतेवाजीशुभ्रेभिरंशुभिः ॥
पतिःसिंधूनांभवन् ॥ एषवस्नूनिपिब्दनापरुषायायिवाँऽअति ॥
अवशादेषुगच्छति ॥ एतंमृजंतिमर्ज्यमुपद्रोणेष्वायवः ॥ प्र

मान.

॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्राणंमहीरिषः ॥ एतमुत्यंदशक्षिपोमृजंतिसप्तधीतयः ॥
स्वायुधंमादिन्तमं ॥ ५ ॥ प्रतेसोतारऽओण्योरसंमदायघृष्वये
॥सर्गोनतक्त्येतशः ॥ क्रत्वादक्षस्यरथ्यं मपोवसानमंधसा ॥गोषा
मण्वेषुसाधिम ॥ अनप्तमप्सुदुष्टरंसोमंपवित्रऽआसृज ॥ पुनीहीं
द्रायपातवे ॥ प्रपुनानस्यचेतसासोमःपवित्रेअर्षति ॥ क्रत्वासध
स्यमाददत् ॥ प्रत्वानमोभिरिंदवइंद्रसोमाअसृक्षत ॥ महेभराय
कारिणः ॥ पुनानोरूपेऽअव्येयेविश्वाऽअर्षन्नभिश्रियः ॥ शूरोन
गोषुतिष्ठति ॥ द्विवोनसानुपिप्युषीधारासुतस्यवेधसः ॥ वृथापवि
त्रेऽअर्षति ॥ त्वंसोमाविपश्चितंतनापुनानऽआयुषु ॥ अव्योवारं
विधावसि ॥ ६ ॥ प्रनिम्नेनेवासिंधवोघ्नंतोवृत्राणिभूर्णयः ॥ सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव. ॥१०॥

मा॑असृग्रमा॒शवः॑ ॥ अभि॑सु॒वा॒नास॒ऽइंद॑वो॒वृष्ट॑यः॒पृथि॒वीमिव ॥
इंद्र॒सोमा॑सो॒ऽअक्षरन् ॥ अत्यू॑र्मिर्मत्स॒रोम॑दः॒सोमः॑प॒वित्रे॑ऽअर्षति
॥ वि॒घ्नन्रक्षां॑सिदेव॒युः ॥ आक॒लशे॑षुधावतिप॒वित्रे॒परि॑षिच्यते ॥
उ॒क्थैर्य॒ज्ञेषु॑वर्धते ॥ अति॒त्रीसो॑मरोच॒नारोह॑न्भ्राजसे॒दिवं॑ ॥ इ॒
ष्णन्त्सूर्य॒नचो॑दयः ॥ अभि॑विप्रा॑ऽअनूषतमू॒र्धन्य॒ज्ञस्य॑का॒रवः॑ ॥
दधा॑ना॒श्चक्ष॑सिप्रि॒यं ॥ तमु॑त्वावा॒जिनं॑नरो॑धी॒भिर्वि॑प्रा॑ऽअव॒स्यवः॑ ॥
मृ॒जंति॑दे॒वता॑तये ॥ मधो॒र्धारा॒मनु॑क्षरती॒व्रःस॒धस्थ॒मास॑दः ॥ चा
रु॑रर्क॒नाय॑पी॒तये॑ ॥ ७ ॥ परि॑सुवा॒नोगि॑रि॒ष्ठाःप॒वित्रे॒सोमो॑ऽअक्षाः
॥ मदे॑षुसर्व॒धाऽअसि ॥ त्वंविप्र॒स्त्वंक॒विर्मधुप्रजा॒तमंध॑सः ॥
मदे॑षुसर्व॒धाऽअ॑सि ॥ तवा॒विश्वे॑स॒जोष॑सोदे॒वासः॑पी॒तिमा॑शत ॥

मान. ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेदेषुसर्वधाऽअसि ॥ आयोविश्वानिवार्यावस्नानिहस्तयोर्दधे ॥ म
देषुसर्वधाऽअसि ॥ यऽइमेरोदसीमहीसंमातरेवदोहते ॥ मेदेषुस
र्वधाऽअसि ॥ परियोरोदसीउभेसद्योवाजेभिरर्षति ॥ मेदेषुसर्व
धाऽअसि ॥ सशुष्मीकलशेष्वापुनानोऽअचिक्रदत् ॥ मेदेषुसर्व
धाऽअसि ॥ ८ ॥ यत्सोमचित्रमुक्थ्यंदिव्यंपार्थिवंवसु ॥ तन्नः
पुनानऽआभर ॥ युवंहिस्थःस्वर्पतीऽइंद्रश्चसोमगोपती ॥ ईशा
नापिप्यतंधियः ॥ वृषापुनानऽआयुषुस्तनयन्नधिबर्हिषि ॥ हरिः
सन्योनिमासदत् ॥ अत्रावशंतधीतयोवृषभस्याधिरेतसि ॥ सू
नोर्वत्सस्यमातरः ॥ कुविद्वृषण्यंतीभ्यःपुनानोगर्भमादधत् ॥ याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्रंदुहतेपयः ॥ उपशिक्षापतस्थुषोभियसमाधेहिशत्रुषु ॥
पवमानाविदारयिं ॥ निशत्रोःसोमवृष्ण्यंनिशुष्मंनिवयास्तिर ॥ दू
रेवासतोऽअंतिवा ॥ ९ ॥ प्रकविर्देववीतयेव्योवारेभिरर्षति ॥ सा
ह्वान्विश्वाऽअभिस्पृधः ॥ सहिष्माजरितृभ्यऽआवाजंगोमतामि
न्वति ॥ पवमानःसहस्रिणं ॥ परिविश्वानिचेतसामृशसेपवसेम
ती ॥ सनःसोमश्रवोविदः ॥ अभ्यर्षबृहद्यशोमघवद्भ्योधुवंरयिं॥
इषंस्तोतृभ्यऽआभर ॥ त्वंराजेवसुव्रतोगिरःसोमाविवेशिथ ॥
पुनानोवन्हेऽअद्भुत ॥ सवन्हिरप्सुदुष्टरोमृज्यमानोगभस्त्योः ॥
सोमश्रमुषूसीदति ॥ क्रीळुर्मखोनमंहयुःपवित्रंसोमगच्छसि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दधत्स्तोत्रेषु गौर्यं ॥ १० ॥ एतेधावंतींदवःसोमाऽइंद्रायवृ
ष्टयः ॥ मत्सरासःस्वर्विदः ॥ प्रवृण्वंतोऽअभियुजःसुष्वयेवरिवोविदः ॥ स्वयंस्तोत्रेवयस्कृतः ॥ वृथाक्रीळंतऽइंदवःसधस्थमभ्येकमित् ॥ सिंधोरूर्माव्यक्षरन् ॥ एतेविश्वानिवार्यापवमानासऽआशत ॥ हितानसप्तयोरथे ॥ आस्मिन्पिशंगमिंदवोदधातावेनमादिशे ॥ योअस्मभ्यमरावा ॥ ऋभुर्नरथ्यंनवंदधातुकेतमादिशे ॥ शुक्राःपवध्वमर्णसा ॥ एतऽउत्येऽअवीवशन्काष्ठांवाजिनोऽअक्रत ॥ सतःप्रासाविषुर्मतिं ॥ ११ ॥ एतेसोमासऽआशवोऽरथाऽइवप्रवाजिनः ॥ सर्गाःसृष्टाऽअहेषत ॥ एतेवातांऽइवोरवःपर्जन्यस्येववृष्टयः ॥ अग्नेरिवभ्रमावृथा ॥ एतेपनाविं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव

॥१२॥

पश्चितःसोमासोदध्याशिरः ॥ त्रिपाव्यानशुर्धियः ॥ एतेमृष्टाऽअ
मर्त्याःसस्वांसोनशश्रमुः ॥ इयक्षंतःपथोरजः ॥ एतेपृष्ठानि
रोदसोर्विप्रयंतोव्यानशुः ॥ उतेदमुत्तमंरजः ॥ तंतुंतन्वानमुत्तम
मनुप्रवतऽआशत ॥ उतेदमुत्तमाद्यं ॥ त्वंसोमपाणिभ्यऽआवसु
गव्यानिधारयः ॥ ततंतंतुमचिक्रदः ॥ १२ ॥ सोमाऽअसृग्रमा
शत्रोमधोर्मदस्यधारया ॥ अभिविश्वानिकाव्या ॥ अनुप्र
त्नासऽआयवः पदंनवीयोऽअक्रमुः ॥ रुचेजनंतसूर्यं ॥ आ
पवमाननोभरार्योऽअदाशुषोगयं ॥ कृधिप्रजावतीरिषः ॥ अ
भिसोमासऽआयवः पवंतेमद्यंमदं ॥ अभिकोशंमधुश्चुतं ॥
सोमोऽअर्षति धर्णसिर्दधानऽइंद्रियंरसं ॥ सुवीरोऽअ

मान.

॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिशास्तिपाः ॥ इंद्रायसोमपवसेदेवेभ्यःसधमाद्यः ॥ इंदोवा
जंसिषाससि ॥ अस्यपीत्वामदानामिंद्रोवृत्राण्यप्रति ॥ जघा
नजघनच्चमु ॥ १३ ॥ प्रसोमासोऽअधन्विषुःपवमानासऽइंद
वः ॥ श्रीणानाऽअप्सुमृंजत ॥ अभिगावोऽअधन्विषुरापोन
प्रवतायतीः ॥ पुनानाऽइंद्रमाशत ॥ प्रपवमानधन्वासिसोमेंद्रा
यपातवे ॥ नृभिर्यतोविनीयसे ॥ त्वंसोमनृमादनःपवस्वचर्षणी
सहे ॥ सस्निर्योऽअनुमाद्यः ॥ इंदोयदद्रिभिःसुतःप
वित्रंपारिधावसि ॥ अरमिंद्रस्यधाम्ने ॥ पवस्ववृत्रहन्त
मोक्थेभिरनुमाद्यः ॥ शुचिःपावकोऽअद्भुतः ॥ शुचिःपाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव ॥१३॥

कऽउच्यतेसोमःसुतस्यमध्वः ॥ देवावीरंघर्शंसहा ॥ १४ ॥
पवस्वदक्षसाधनोदेवेभ्यः पीतयेहरे ॥ मरुद्भ्योवायवेमदः
पवमानधियाहितो ऽभियोनिकनिक्रदत् ॥ धर्मणावायुमाविश
॥ संदेवैःशोभतेवृषाकविर्योनावधिप्रियः ॥ वृत्रहादेवकीत
मः ॥ विश्वारूपाण्याविशन्पुनानोयातिहर्यतः ॥ यत्रामृतासऽ
आसते ॥ अरुषोजनयन्गिरःसोमःपवतआयुषक् ॥ इंद्रंगच्छन्क
विक्रतुः ॥ आपवस्वमदिंतमपवित्रंधारयाकवे ॥ अर्कस्ययोनि
मासदं ॥ १५ ॥ तमीमृक्षंतवाजिनंमुपस्थेऽअदितेरधि ॥ विप्रासोऽ
आण्व्याधिया ॥ तंगावोऽअभ्यनूषतसहस्रधारमक्षितं ॥ इंदुंध
र्त्तारमादिवः ॥ तंवेधांमेधयाह्यन्पवमानमधिद्यवि ॥ धर्णसिंभू

मान.

॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिधायसं ॥ तमह्यन्भुरिजोर्धियासंवसानंविवस्वतः ॥ पतिं
वाचोऽअदाभ्यं ॥ तंसानावधिजामयोहरिंहिन्वंत्यद्रिभिः ॥
हर्यतंभूरिचक्षसं ॥ तंत्वाहिन्वंतिवेधसः पवमानगिरावृधं
॥ इंद्रविंद्रायमत्सरं ॥ १६ ॥ एषकविरभिष्टुतःपवित्रेऽ
अधितोशते ॥ पुनानोघ्नन्नपास्रिधः ॥ एषऽइंद्रायवायवेस्वार्जी
त्परिषिच्यते ॥ पवित्रेदक्षसाधनः ॥ एषनृभिर्विनीयतेदिवोमूर्धा
वृषासुतः ॥ सोमोवनेषुविश्वावित् ॥ एषगव्युरचिक्रदत्पवमानो
हिरण्ययुः ॥ इंदुःसत्राजिदस्तृतः ॥ एषसूर्येणहासतेपवमानोऽ
अधिद्यवि ॥ पवित्रेमत्सरोमदः ॥ एषशुष्म्यसिष्यददंतरिक्षेवृषा
हरिः ॥ पुनानऽइंदुरिंद्रमा ॥ १७ ॥ एषवाजीहितोनृभिर्विश्वावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मनेसस्पतिः ॥ अव्योवारंविधावति ॥ एषपवित्रेऽअक्षरत्सो
मोदेवेभ्यःसुतः ॥ विश्वाधामान्याविशन् ॥ एषदेवःशुभायतेधि
योनावमर्त्यः ॥ वृत्रहादेवतीतमः ॥ एषवृषाकनिक्रदद्दशाभि
र्जामिभिर्यतः ॥ अभिद्रोणानिधावति ॥ एषसूर्यमरोचयत्पवमा
नोविचर्षणिः ॥ विश्वाधामानिविश्ववित् ॥ एषशुष्म्यदाभ्यःसोमः
पुनानोऽअर्षति ॥ देवावीरघशंसहा॥१८॥प्रास्यधाराऽअक्षरन्वृष्णः
सुतस्यौजसा ॥ देवाँऽअनुप्रभूषतः ॥ सप्रिंमृजंतिवेधसोगृणंतःकार
वोगिरा ॥ ज्योतिर्जज्ञानमुक्थ्यं ॥ सुषहासोमतानितेपुनानायप्रभू
वसो॥वर्धासमुद्रमुक्थ्य॥ विश्वावसूनिसंजयन्पवस्वसोमधारया॥
इनुद्वेषांसिसध्र्यक् ॥ रक्षासुनोऽअरुषःस्वनात्समस्यकस्याचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त् ॥ निदोयत्रमुमुच्महे ॥ एंद्रोपार्थिवंरयिंदिव्यंपवस्वधारया ॥
द्युमंतंशुष्ममाभर ॥ १९ ॥ प्रधाराऽअस्यशुष्मिणोवृथापवित्रेऽ
अक्षरन् ॥ पुनानोवाचमिष्यति ॥ इंदुर्हियानःसोतृभिर्मृज्यमानः
कनिक्रदत् ॥ इयर्तिवग्नुमिंद्रियं ॥ आनःशुष्मंनृषाह्यंवीरवंतंपुरु
स्पृहं ॥ पवस्वसोमधारया ॥ प्रसोमोऽअतिधारयापवमानोऽअ
सिष्यदत् ॥ अभिद्रोणान्यासदं ॥ अप्सुत्वामधुमत्तमंहरिंहिन्वं
त्यद्रिभिः ॥ इंद्रविंद्रायपीतये ॥ सुनोतामधुमत्तमंसोममिंद्राय
वज्रिणे ॥ चारुंशर्धायमत्सरं ॥ २० ॥ प्रसोमासःस्वाध्यः[1]पव
मानासोऽअक्रमुः ॥ रयिंकृण्वंतिचेतनं ॥ दिवस्पृथिव्याऽअधिभ
वेंदोद्युम्नवर्धनः ॥ भवावाजानांपतिः ॥ तुभ्यंवाताऽआभिप्रियस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यमर्षंतिसिंधवः ॥ सोमवर्धंतितेमहः ॥ आप्यायस्वसमेतुतेवि
श्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ तुभ्यंगावोघृतंपयोबभ्रो
दुदुह्रेऽअक्षितं ॥ वर्षिष्ठेऽअधिसानवि ॥ स्वायुधस्यतेसतोभुवन
स्यपतेवयं ॥ इंदोसखित्वमुश्मसि ॥ २१ ॥ प्रसोमासोमदच्युतः
श्रवसेनोमघोनः ॥ सुताविदथेऽअक्रमुः ॥ आदींत्रितस्ययोषणो
हरिंहिन्वंत्यद्रिभिः ॥ इंदुमिंद्रायपीतये ॥ आदींहंसोयथागणंविश्वे
स्यावीवशन्मतिं ॥ अत्योनगोभिरज्यते ॥ उभेसोमावचाकशा
न्मृगोनतक्तोऽअर्षसि ॥ सीदन्नृतस्ययोनिमा ॥ अभिगावोऽअनू
षतयोषाजारमिवप्रियं ॥ अगन्नाजिंयथाहितं ॥ अस्मेधेहिद्युम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यशोमघवद्भ्यश्चमह्यंच ॥ सनिंमेधामुतश्रवः ॥ २२ प्रसोमासो
विपश्चितोपांनयंत्यूर्मयः ॥ वनानिमहिषाऽइव ॥ अभिद्रोणानि
बभ्रवःशुक्राऽऋतस्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताऽइंद्रा
यवायवेवरुणायमरुद्भ्यः ॥ सोमाऽअर्षंतिविष्णवे ॥ तिस्रोवाच
ऽउदीरतेगावोमिमंतिधेनवः ॥ हरिरोतिकनिक्रदत् ॥ अभिब्रह्मीर
नूषतयव्हीऽऋतस्यमातरः ॥ मर्मृज्यंतेदिवःशिशुं ॥ रायःसमुद्रां
श्चतुरोस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणः ॥ २३ ॥ प्रसुवा
नोधारयातनेंदुर्हिन्वानोऽअर्षति ॥ रुजद्दृळ्हाव्योजसा ॥ सुतऽइं
द्रायवायवेवरुणायमरुद्भ्यः ॥ सोमोऽअर्षतिविष्णवे ॥ वृषाणंवृ
षभिर्यतंसुन्वंतिसोममद्रिभिः ॥ दुहंतिशक्मनापयः ॥ भुवत्रित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमज्योभुवादिंद्रायमत्सरः ॥ संरूपैरज्यतेहरिः ॥ अभीमृतस्य
विष्टपंदुहतेपृश्निमातरः ॥ चारुंप्रियतमंहविः ॥ समेनमन्हुताऽइ
मागिरोऽअर्षतिसस्रुतः ॥ धेनुर्वाश्रोऽअवीवशत् ॥ २४ ॥
॥ आनःपवस्वधारयापवमानरयिंपृथुं ॥ ययाज्योतिर्विदासि
नः ॥ इंदोसमुद्रमीखयपवस्वविश्वमेजय ॥ रायोधर्तानऽ
ओजसा ॥ त्वयावीरेणवीरवोभिष्यामपृतन्यतः ॥ क्षरांणोऽअ
भिवार्यं ॥ प्रवाजमिंदुरिष्यतिसिषासन्वाजसाऽऋषिः ॥
व्रताविदानऽआयुधा ॥ तंगीर्भिर्वाचमीखयंपुनानंवासयामसि ॥
सोमंजनस्यगोपातिं ॥ विश्वोयस्यव्रतेजनोदाधारधर्मणस्पतेः ॥
पुनानस्यप्रभूवसोः ॥ २५ ॥ असर्जिरथ्योयथापवित्रेचम्वोःसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः ॥ कार्ष्मन्वाजीन्यक्रमीत् ॥ सवान्हिः सोमजागृविः पवस्वदे
ववीरति ॥ अभिकोशंमधुश्चुतं ॥ सनोज्योतींषिपूर्व्यपवमानवि
रोचय ॥ क्रत्वेदक्षायनोहिनु ॥ शुंभमानऽऋतायुभिर्मृज्यमानो
गभस्त्योः ॥ पवतेवारेऽअव्यये ॥ साविश्वादाशुषेवसुसोमोदिव्या
निपार्थिवा ॥ पवतामांतरिक्ष्या ॥ आदिवस्पृष्ठमश्वयुर्गव्ययुः
सोमरोहसि ॥ वीरयुः शवसस्पते ॥ २६ ॥ ससुतःपीतयेवृषासो
मःपवित्रेऽअर्षति ॥ विघ्नन्रक्षांसिदेवयुः ॥ सपवित्रेविचक्षणो
हरिरर्षतिधर्णसिः ॥ अभियोनिंकनिक्रदत् ॥ सवाजीरोचनादि
वःपवमानोविधावति ॥ रक्षोहावारमव्ययं ॥ सत्रितस्याधिसाने
त्रिपवमानोऽअरोचयत् ॥ जामिभिःसूर्यंसह ॥ सवृत्रहावृषासु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव. ॥१७॥

तोवरिवोविददाभ्यः ॥ सोमोवाजमिवासरत् ॥ सदेवःकविनेषि
तोऽभिद्रोणानिधावति ॥ इंदुरिंद्रायमंहना ॥ २७ ॥ एषऽउस्यवृ
षारथोव्योवारेभिरर्षति ॥ गछन्वाजंसहस्रिणं ॥ एतंत्रितस्ययोष
णोहरिंहिन्वंत्यद्रीभिः ॥ इंदुमिंद्रायपीतये ॥ एतंत्यंहरितोदशमर्मृ
ज्यंतेऽअपस्युवः ॥ याभिर्मदायशुंभते ॥ एषस्यमानुषीष्वाश्येनो
नविक्षुसीदति ॥ गछन्जारोनयोषितं ॥ एषस्यमद्योरसोवचष्टे
दिवःशिशुः ॥ यऽइंदुर्वारमाविशत् ॥ एषस्यपीतयेसुतोहरिरर्ष
तिधर्णसिः ॥ क्रंदन्योनिमभिप्रियं ॥ २८ ॥ आशुरर्षबृहन्मते
परिप्रियेणधाम्ना ॥ यत्रदेवाऽइतिब्रवन् ॥ परिष्कृण्वन्ननिष्कृतं
जनाययातयन्निषः ॥ वृष्टिंदिवःपरिस्रव ॥ सुतऽएतिपवित्रऽ

मान. ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्विषिंदधानऽओजसा ॥ विचक्षाणोविरोचयन् ॥ अयंसयो
दिवस्परिरघुयामापवित्रऽआ ॥ सिंधोरूर्माव्यक्षरत् ॥ आविर्वा
सन्परावतोअथोऽअर्वावतःसुतः ॥ इंद्रायासिच्यतेमधु ॥ समीची
नाऽअनूषतहरिंहिन्वंत्यद्रिभिः ॥ योनावृतस्यसीदत ॥ २९॥ पु
नानोऽअक्रमीदभिविश्वामृधोविचर्षणिः ॥ शुंभंतिविप्रंधीतिभिः ॥
आयोनिमरुणोरुहद्रमादिंद्रंवृषासुतः ॥ ध्रुवेसदसिसीदति ॥ नूनो
रयिंमहामिंदोस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणं ॥ विश्वा
सोमपवमानद्युम्नानींदवाभर ॥ विदाःसहस्रिणीरिषः ॥ सनःपु
नानआभरररयिंस्तोत्रेसुवीर्यं ॥ जरितुर्वर्धयागिरः ॥ पुनानऽइंदवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भरसोमद्विबर्हसंरायिं ॥ वृषन्निंदोनऽउक्थ्यं ॥ ३० ॥ प्रयेगावोन
भूर्णयस्त्वेषाऽअयासोऽअक्रमुः ॥ घ्नंतःकृष्णामपत्वचं ॥ सुवित
स्यमनामहेतिसेतुंदुराव्यं ॥ साव्हांसोदस्युमव्रतं ॥ श्रृण्वेवृष्टेरिव
स्वनःपवमानस्यशुष्मिणः ॥ चरंतिविद्युतोदिवि ॥ आपवस्वम
हीमिषंगोमदिंदोहिरण्यवत् ॥ अश्वावद्वाजवत्सुतः ॥ सपवस्वावि
चर्षणऽआमहीरोदसीपृण ॥ उषाःसूर्योनरश्मिभिः ॥ परिणःश
र्मयंत्याधारयासोमविश्वतः ॥ सरारसेवविष्टपं ॥ ३१ ॥ जनय
न्रोचनादिवोजनयन्नप्सुसूर्यं ॥ वसानोगाऽअपोहरिः ॥ एषप्रत्नेन
मन्मनादेवोदेवेभ्यस्परि ॥ धारयापवतेसुतः ॥ वावृधानायतूर्वये
पवंतेवाजसातये ॥ सोमाःसहस्रपाजसः ॥ दुहानःप्रत्नमित्पयःप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वित्रेपरिषिच्यते ॥ क्रंदन्देवाँऽअजीजनत् ॥ अभिविश्वानिवार्या
भिदेवाँऽऋतावृधः ॥ सोमःपुनानोऽअर्षति ॥ गोमन्नःसोमवीरव
दश्वावद्वाजवत्सुतः ॥ पवस्वबृहतीरिषः ॥ ३२ ॥ योऽअत्यइव
मृज्यतेगोभिर्मदायहर्यतः ॥ तंगीभिर्वासयामसि ॥ तन्नोविश्वाऽ
अवस्युवोगिरःशुंभंतिपूर्वथा ॥ इंदुमिंद्रायपीतये ॥ पुनानोयाति
हर्यतःसोमोगीर्भिःपरिष्कृतः ॥ विप्रस्यमेध्यातिथेः ॥ पवमानवि
दारयिमस्मभ्यंसोमसुश्रियं ॥ इंदोसहस्रवर्चसं ॥ इंदुरत्योनवाज
सृत्कनिक्रंतिपवित्रऽआ ॥ यदक्षारतिदेवयुः ॥ पवस्ववाजसात
येविप्रस्यगृणतोवृधे ॥ सोमरास्वसुवीर्यं ॥ ३३ ॥ इतिपवमानोद्वि
तीयोध्यायः ॥ ॥हरिःॐम्॥प्रणऽइंदोमहेतनऽऊर्मिन्नाबि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्र.

॥१९॥

भ्रंदर्षासि ॥ अभिदेवाँऽअयास्यः ॥ मतीजुष्टोधियाहितःसोमोहि
न्वेपरावति ॥ विप्रस्यधारयाकविः ॥ अयंदेवेषुजागृविःसुतऽए
तिपवित्रऽआ ॥ सोमोयातिविचर्षणिः ॥ सनःपवस्ववाजयुश्च
क्राणश्चारुमध्वरं ॥ बर्हिष्माँऽआविवासति ॥ सनोभगायवायवे
विप्रवीरःसदावृधः ॥ सोमोदेवेष्वायमत् ॥ सनोऽअद्यवसुत्त
येक्रतुविद्वातुवित्तमः ॥ वाजंजेषिश्रवोबृहत् ॥ १ ॥ सपवस्वमदा
यकंनृचक्षादेववीतये ॥ इंदविंद्रापीतये ॥ सनोऽअर्षाभिदूत्यं
त्वमिंद्रायतोशसे ॥ देवान्त्सखिभ्यऽआवरे ॥ उतत्वामरुणंवयं
गोभिरञ्ज्मोमदायकं ॥ विनोरायेदुरोवृधि ॥ अत्यूपवित्रमक्रमी
द्वाजीधुरंनयामनि ॥ इंदुर्देवेषुपत्यते ॥ समीसखायोऽअस्वर

मान

॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वनेक्रीळंतमत्यविं ॥ इंदुंनावाऽअनूषत ॥ तयापवस्वधारयाय
यापीतोविचक्षसे ॥ इंदोस्तोत्रेषुरीयसे ॥ २ ॥ असृग्रन्देववीतये
त्यासःकृल्व्याऽइव ॥ क्षरंतःपर्वतावृधः ॥ परिष्कृतासऽइन्देवो
योवेवपित्र्यावती ॥ वायुंसोमाऽअसृक्षत ॥ एतेसोमासऽइंदवः
प्रयस्वंतश्चमूषुताः ॥ इन्द्रंवर्धंत्तिकर्मभिः ॥ आधावतासुहस्त्यः
शुक्रागृभ्णीतमंथिना ॥ गोभिःश्रीणीतमत्सरं ॥ सर्पवस्वधनं
जयप्रयंतारार्घसोमहः ॥ अस्मभ्यंसोमगातुवित् ॥ एतंमृजंतिम
ज्यंपवमानंदशक्षिपः ॥ इंद्रायमत्सरंमदं ॥ अयासोमःसुकृ
त्ययामहश्चिदभ्यवर्धत ॥ मंदानऽउद्वृषायते ॥ कृतानीदस्युकर्त्वा
चेतंतेदस्युतर्हणा ॥ ऋणाचेधृष्णुश्चयते ॥ आत्सोमेऽइंद्रियोरसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥२०॥

वर्चः सहस्रसा भुवत् ॥ उक्थं यदस्य जायते ॥ स्वयं कविर्विधर्तरि
विप्राय रत्नमिच्छति ॥ यदीमर्मृज्यतेधियः ॥ सिषासन्तूर्यीणां वाजे
ष्वर्वतामिव ॥ भरेषु जिग्युषामसि ॥४॥ तं त्वा नृम्णानि बिभ्रतं सध
स्थेषु महो दिवः ॥ चारुं सुकृत्ययेमहे ॥ संवृक्तधृष्णुमुक्थ्यं महामे
हिव्रतं मद ॥ शतं पुरो रुरुक्षणिं ॥ अतस्त्वा रयिमभि राजानं सुक्र
तो दिवः ॥ सुपर्णोऽअव्यथिर्भरत् ॥ विश्वस्माऽइत्स्वर्दृशे साधारं
णं रजस्तुरं ॥ गोपामृतस्य विर्भरत् ॥ अधाहिन्वानऽइंद्रियं ज्यायो
महित्वमानशे ॥ अभिष्टिकृद्विचर्षणिः ॥ ५ ॥ पवस्व वृष्टिमा सु
नो पामूर्मिं दिवस्परि ॥ अयक्ष्मा बृहतीरिषः ॥ तया पवस्व धारया
यया गावऽइहागमन् ॥ जन्यासऽउपनो गृहं ॥ धृतं पवस्व धारया

मान.

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञेषुदेववीतमः ॥ अस्मभ्यंवृष्टिमापव ॥ सनऽऊर्जेव्य१व्ययंप
वित्रंधावधारया ॥ देवासःशृणवन्हिकं ॥ पवमानोऽअसि
ष्यदद्रक्षांस्यपजंघनन् ॥ प्रलवद्रोचयन्रुचः ॥ ६ ॥ उत्ते
शुष्मासऽईरतेसिंधोरूर्मेरिवस्वनः ॥ वाणस्यचोदयापवि ॥
॥ प्रसवेतऽउदीरतेतिस्रोवाचोमखस्युवः ॥ यदव्यऽएषिसा
नवि ॥ अव्योवारेपरिप्रियंहरिंहिन्वन्त्यद्रिभिः ॥ पव
मानंमधुश्चुत ॥ आपवस्वमदिन्तमपवित्रंधारयाकवे ॥ अर्क
स्ययोनिमासदं ॥ सपवस्वमदिन्तमगोभिरंजानोऽअक्तुभिः ॥
इंद्रविंद्रायपीतये ॥ ७ ॥ अध्वर्योऽअद्रिभिःसुतंसोमंपवित्रऽआ
सृज ॥ पुनीहींद्रायपातवे ॥ दिवःपीयूषमुत्तमंसोममिंद्रायवृचिणे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सुनोतामधुमत्तमं ॥ तवत्यऽइंदोऽअंधसोदेवामधोर्व्यश्नते ॥
पवमानस्यमरुतः ॥ त्वंहिसोमवर्धयन्त्सुतोमदायभूर्णये ॥ वृष
न्त्स्तोतारमूतये ॥ अभ्यर्षविचक्षणपवित्रंधारयासुतः ॥ अभित्वा
जमुतश्रवः॥ ८ ॥ परिद्युक्षःसनद्रयिर्भरद्वाजंनोऽअंधसा ॥ सुवा
नोऽअर्षपवित्रऽआ ॥ तवप्रत्नेभिरध्वभिरव्योवारेपरिप्रियः ॥ स
हस्रधारोयात्तना ॥ चरुर्नयस्तमींखयेंदोनदानमींखय ॥ वधैर्व
धस्नवींखय ॥ निशुष्मंमिंदत्रेषांपुरुहूतजनानां ॥ योऽअस्माँऽ
आदिदेशति ॥ शतंनऽइंदऽऊतिभिःसहस्रंवाशुचीनां ॥ पवस्वमं
हयद्रयिः ॥ ९ ॥ उत्तेशुष्मासोऽअस्थुरक्षोभिंदंतोऽअद्रिवः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुदस्वयाःपरिस्पृधः ॥ अयानिजाग्निरोजसारथसंगेधनेहिते ॥
स्तवाऽअबिभ्युषात्दृढा ॥ अस्यव्रतानिनाधृषेपवमानस्यदूढ्या ॥
रुजयस्त्वापृतन्यति ॥ तंहिन्वंतिमदच्युतंहरिंनदीषुवाजिनं ॥
इंदुमिंद्रायमत्सरं ॥ १० ॥ अस्यप्रत्नामनुद्युतंशुक्रंदु
दुहरेअह्रयः ॥ पयःसहस्रसामृषिं ॥ अयंसूर्यऽइवोपदृगयंसरां
सिधावति ॥ सप्तप्रवतऽआदिवं ॥ अयंविश्वानितिष्ठतिपुनानोभुव
नोपरि ॥ सोमोदेवोनसूर्यः ॥ परिणोदेववीतयेवाजाँऽअर्षासि
गोमतः ॥ पुनानऽइंदाविंद्रयुः ॥ ११ ॥ यवंयवंनोऽअंधसापुष्टं
पुष्टंपरिस्रव ॥ सोमविश्वाचसौभगा ॥ इंदोयथातवस्तवोयथातेजा
तमंधसः ॥ निबर्हिषिप्रियेसदः ॥ उतनोगोविदश्ववित्पवस्वसोमां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धसा ॥ मक्षूतमेभिरहभिः ॥ योजिनातिनजीर्यतेहंतिशत्रुम
भीत्य ॥ सपवस्त्वसहस्रजित् ॥ १२ ॥ परिसोमऽऋतंबृहदाशुः
पवित्रेऽअर्षति ॥ विघ्नन्रक्षांसिदेवयुः ॥ यत्सोमोवाजमर्षतिश
तंधारोअपस्युवः ॥ इंद्रस्यसख्यमाविशन् ॥ अभित्वायोषणो
दशोजारंनकन्यानूषत ॥ मृज्यसेसोमसातये ॥ त्वामिंद्रायविष्णे
वेस्वादुरिंद्रोपरिस्रव ॥ नृन्त्स्तोतॄन्पाह्यंहसः ॥ १३ ॥ प्रतेधारोऽ
असश्चतोदिवोनयंतिवृष्टयः ॥ अश्वोवाजंसहस्रिणं ॥ अभिप्रिया
णिकाव्याविश्वाचक्षाणोअर्षति ॥ हरिस्तुंजानऽआयुधा ॥ सभे
मृजानऽआयुभिरिभोराजेवसुव्रतः ॥ श्येनोनवंसुषीदाति ॥
सनोविश्वादिवोवसूतोपृथिव्याऽअधि ॥ पुनानऽइंदवाभर ॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरत्समंदीधावतिधारासुतस्यांधसः ॥ तरत्समंदीधावति ॥
उस्रावेदंवसूनांमर्तस्यदेव्यंवसः ॥ तरत्स० ॥ ध्वस्रयोःपुरुषं
त्योरासहस्राणिदद्महे ॥ तरत्स० ॥ आययोस्त्रिंशतंतनासहस्राणिचदद्महे ॥ तरत्स० ॥ १५ ॥ पवस्वगोजिदश्वजिद्धिश्वजित्सोमरण्यजित् ॥ प्रजावद्रत्नमाभर ॥ पवस्वाद्भ्योऽअदाभ्यःपवस्वौषधीभ्यः ॥ पवस्वधिषणाभ्यः ॥ त्वंसोमपवमानोविश्वानि दुरितातर ॥ कविःसीदनिबर्हिषि ॥ पवमानःस्वर्विदोजायमानोभवोमहान् ॥ इंदोविश्वाँऽअभीदसि ॥ १६ ॥ प्रगायत्रेणगायतपवमानंविचर्षणिं ॥ इंदुंसहस्रचक्षसं ॥ तंत्वासहस्रचक्षसमथोसहस्रभर्णसं ॥ अतिवारमपाविषुः ॥ अति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वारान्पवमानोऽअसिष्यदत्क्रुलशाँऽअभिधावति ॥ इंद्रस्यहार्द्यावि॒शन् ॥ इंद्रस्यसोम॒राधसे॒शंपवस्वाविचर्षणे ॥ प्र॒जावद्रेत॒ऽआभर ॥ १७ ॥ अ॒यावी॒तीपरिस्रव॒यस्तेऽइंदो॒मदे॒ष्वा ॥ अ॒वाहन्नव॒तीर्नव ॥ पुरः॑स॒द्यऽइ॒त्थाधि॑यो॒दिवो॑दासा॒यशंबरं ॥ अध॒त्यंतु॒र्वशं॒यदुं ॥ परि॑णो॒ऽअश्व॑मश्वा॒विद्गोमा॑दिंदो॒हिर॑ण्यवत् ॥ क्षरा॑सह॒स्रिणी॒रिषः॑ ॥ पव॑मानस्यतेव॒यंपा॒वित्रे॑मभ्युंद॒तः॥ स॒खि॒त्वमावृ॑णीमहे ॥ येते॑पा॒वित्रे॑मू॒र्मयो॑भि॒क्षरं॑ति॒धार॑या॥ तेभि॑र्नःसोममृळय ॥ १८ ॥ सन॑ःपुना॒नऽआभ॑रर॒यिंवी॒रव॑ती॒मिषं ॥ ईशा॑नःसोमावि॒श्वतः॑ ॥ ए॒तमु॒त्यंदश॒क्षिपो॑मृजंति॒सिंधु॒मातरं ॥ समा॑दि॒त्येभि॑रख्यत ॥ समिंद्रे॑णो॒तवा॒युना॑सु॒तऽएति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पवित्रऽआ ॥ संसूर्यस्यरश्मिभिः ॥ सनोभगायवायवेपूष्णेपत्व
स्वमधुमान् ॥ चारुर्मित्रेवरुणेच ॥ उच्चातेजातमंधसोदिविषद्भ
म्यादेदे ॥ उग्रंशर्ममहिश्रवः ॥ १९ ॥ एनाविश्वान्यर्यऽआद्यु
म्नानिमानुषाणां ॥ सिषासंतोवनामहे ॥ सनऽइंद्रायवायवेवरु
णायमरुद्भ्यः ॥ वरिवोवित्परिस्रव ॥ उपोषुजातमत्पुरंगोभि
र्भंगंपरिष्कृतं ॥ इंदुंदेवाऽअयासिषुः ॥ तमिद्वर्धंतुनोगिरोवत्सं सं
शिश्वरीरिव ॥ यऽइंद्रस्यत्वदंसनिः ॥ अर्षाणःसोमशंगवेधुक्ष
स्वपिप्युषीमिषं ॥ वर्धासमुद्रमुक्थ्यं ॥ २० ॥ पवमानोऽअजी
जनद्दिवश्चित्रंनतन्यतुं ॥ ज्योतिर्वैश्वानरंबृहत् ॥ पवमानस्यतेर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोमदेराजन्नदुछुनः ॥ विवारमव्यमर्षति ॥ पवमानरसस्तवदक्षो
विराजतिद्युमान् ॥ ज्योतिर्विश्वंस्वर्दृशे ॥ यस्तेमदोवरेण्यस्तेना
पवस्वांधसा ॥ देवावीरघशंसहा ॥ जह्निर्वृत्रमामित्रियंसास्निर्वा
जंदिवेदिवे ॥ गोषाऽउऽअश्वसाअसि॥२१॥समिश्लोऽअरुषोभवसू
पस्थाभिर्नधेनुभिः ॥ सीदन्छ्येनोनयोनिमा ॥ सपवस्वयऽआ
विथेंद्रंवृत्रायहंतवे ॥ वव्रिवांसंमहीरपः ॥ सुवीरासोवयंधनाज
येमसोममीढ्वः ॥ पुनानोवर्धनोगिरः ॥ त्वोतासस्तवावसास्यामं
वन्वतऽआमुरः ॥ सोमव्रतेषुजागृहि ॥ अपघ्नन्पवतेमृधोपसो
मोऽअराव्णः ॥ गच्छन्निंद्रस्यनिष्कृतं ॥ २२ ॥ महोनोरायऽआ
भरपवमानजहीमृधः ॥ रास्वेंदोवीरवद्यशः ॥ नत्वाशतंचनह्रुतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राधोदित्संतमामिनन् ॥ यत्पुनानोमखस्यसे ॥ पवस्वेंदोवृषा
सुतःकृधीनोयशसोजने ॥ विश्वाऽअपद्विषोजहि ॥ अस्येतेस
ख्येवयंतवेंदोद्युम्नऽउत्तमे ॥ सासह्यामपृतन्यतः ॥ यातेभीमान्या
युधातिग्मानिसंतिधूर्वणे ॥ रक्षांसमस्यनोनिदः ॥ २३ ॥ एतेऽ
असृग्रमिंदवस्तिरःपवित्रमाशवः ॥ विश्वान्यभिसौभगा ॥ विघ्नं
तोदुरितापुरुसुगातोकायवाजिनः ॥ तनाकृण्वंतोऽअर्वते ॥ कृ
ण्वंतोवरिवोगवेभ्यर्षतिसुष्टुतिं ॥ इळामस्मभ्यंसंयतं ॥ असा
व्यंशुर्मदायाप्सुदक्षोगिरिष्ठाः ॥ श्येनोनयोनिमासदत् ॥ शुभ्र
मंधोदेववातमप्सुधूतोनृभिःसुतः ॥ स्वदंतिगावःपयोभिः ॥२४॥
आदीमश्वंनहेतारोऽश्रूशुभंनमृतोय ॥ मध्वोरसंसधमादे ॥ यास्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारामधुश्चुतोसृग्रमिंदऽऊतये ॥ ताभिःपवित्रमासदः ॥ सोऽअ
र्षेंद्रायपीतयेतिरोरोमाण्यव्यया ॥ सीदन्योनावनेष्वा ॥ त्वमिंदो
परिस्रवस्त्वादिष्टोऽअंगिरोभ्यः ॥ वरिवोविद्धृतंपयः ॥ अयंवि
चर्षणिर्हितःपवमानःसचेतति ॥ हिन्वानऽआप्यंबृहत् ॥ २५ ॥
एषवृषावृषव्रतःपवमानोअशास्तिहा ॥ करद्वसूनिदाशुषे ॥ आ
पवस्वसहस्रिणंरयिंगोमंतमश्विनं ॥ पुरुश्चंद्रंपुरुस्पृहं ॥ एषस्य
परिषिच्यतेमर्मृज्यमानऽआयुभिः ॥ उरुगायःकविक्रतुः ॥ सुह
स्रोतिःशतामघोविमानोरजसःकविः ॥ इंद्रायपवतेमदः ॥ गिरा
जातइहस्तुतइंदुरिंद्रायधीयते ॥ चियोनावसुनाचिव ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पवमानःसुतोनृभिःसोमोवाजमिवासरत् ॥ चमूषुशक्मनासदं ॥
तंत्रिपृष्ठेत्रिवंधुरेरथेयुंजंतियातवे ॥ ऋषीणांसप्तधीतिभिः ॥ तं
सोतारोधनस्पृतमाशुंवाजायययातवे ॥ हरिंहिनोतवाजिनं ॥ आ
विवशन्कलशंसुतोविश्वाऽअर्षन्नभिश्रियः ॥ शूरोनगोषुतिष्ठति ॥
आतेऽइंद्रोमदायक्रंपयोदुहंत्यायत्रः ॥ देवादेवेभ्योमधु ॥ २७ ॥
आनःसोमंपवित्रऽआसृजतामधुमत्तमं ॥ देवेभ्योदेवश्रुत्तमं ॥
एतेसोमाऽअसृक्षतगृणानाअत्रसेमहे ॥ मदिन्तमस्यधारया ॥
अभिगव्यानिवीतयेनृम्णापुनानोऽअर्षसि ॥ सनद्वाजःपरिस्रव ॥
उतनोगोमतीरिषोविश्वाऽअर्षपरिष्टुभः ॥ गृणानोजमदग्निना ॥
पवस्ववाचोऽअग्रियः सोमचित्राभिरूतिभिः ॥ अभिविश्वानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काव्या ॥ २८ ॥ त्वंसमुद्रियाअपोग्रियोवाचईरयन् ॥ पवस्व
विश्वमेजय ॥ तुभ्येमाभुवनाकवेमहिम्नेसोमतस्थिरे ॥ तुभ्यम
र्षन्तिसिंधवः ॥ प्रेतेदिवोनवृष्टयोधारायंत्यसश्चतः ॥ अभिशुक्रा
मुपस्तिरं ॥ इंद्रायेंदुंपुनीतनोयंदक्षायसाधनं ॥ ईशानंवीतिराध
सं ॥ पवमानऋतःकविःसोमःपवित्रमासदत् ॥ दधत्स्तोत्रेसु
वीर्यं ॥ २९ ॥ आपवस्वसहस्रिणंरयिंसोमसुवीर्यं ॥ अस्मेश्रवां
सिधारय ॥ इषमूर्जंचपिन्वसइंद्रायमत्सरिंतमः ॥ चमूष्वानि
षीदसि ॥ सुतइंद्रायविष्णवेसोमःकलशेअक्षरत् ॥ मधुमाँऽअ
स्तुवायवे ॥ एतेअंसयमाशवोतिव्हरांसिबभ्रवः ॥ सोमाऽऋत
स्यधारया ॥ इंद्रंवर्धंतोअप्तुरःकृण्वंतोविश्वमार्यं ॥ अपघ्नंतोअ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोण्णः ॥ ३० ॥ सुताअनुस्वमारजोभ्यर्षतिबभ्रवः ॥ इंद्रंगछं
तइंदवः ॥ अयापवस्वधारयाययासूर्यमरोचयः ॥ हिन्वानोमा
नुषीरपः ॥ अयुक्तसूरएतशंपवमानोमनावधि ॥ अंतरिक्षेण
यातवे ॥ उतत्याहरितोदशसूरोअयुक्तयातवे॥इंदुरिंद्रइतिब्रुवन् ॥
परीतोवायवेसुतंगिरइंद्रायमत्सरं ॥ अव्योवारेषुसिंचत ॥ ३१ ॥
पवमानविदारयिमस्मभ्यंसोमदुष्टरं ॥ योदूणाशोवनुष्यता ॥ अ
भ्यर्षसहस्रिणंरयिंगोमंतमश्विनं ॥ अभिवाजमुतश्रवः ॥ सो
मोदेवोनसूर्योद्रिभिःपवतेसुतः ॥ दधानःकलशेरसं ॥ एतेधामा
न्यार्याशुक्राऋतस्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताइंद्रायव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव. ॥२७॥

त्रिणेसोमासोदध्याशिरः ॥ पवित्रमत्यक्षरन् ॥ ३२ ॥ प्रसो
ममधूमत्तमोरायेअर्षपवित्रऽआ ॥ मदोयोदेवतीतमः ॥ तमी
मृजंत्यायवोहरिंनदीषुवाजिनं॥ इंदुमिंद्रायमत्सरं ॥ आपवस्व
हिरण्यवदश्वावत्सोमवीरवत् ॥ वाजंगोमंतमाभर ॥ परिवाजेन
वाजयुमव्योवारेषुसिंचत ॥ इंद्रायमधुमत्तमं ॥ कविंमृजंतिम
र्ज्यंधीभिर्वीप्राअवस्यवः ॥ वृषाकनिक्रदर्षति ॥ ३३ ॥
वृषणंधीभिरप्तुरंसोममृतस्यधारया ॥ मतीविप्राःसमस्वरन्
॥ पवस्वदेवायुषगिंद्रंगच्छतुतेमदः ॥ वायुमारोहधर्मणा ॥
पवमानानितोशसेरयिंसोमश्रवाय्यं ॥ प्रियःसमुद्रमाविश ॥
॥ अपघ्नन्पवसेमृधःक्रतुवित्सोममत्सरः ॥ नुदस्वादेवयुं

मान ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनं ॥ पवमानाअसृक्षतसोमाःशुक्रासइंदवः ॥ अभिविश्वा
निकाव्या ॥ ३४ ॥ पवमानासऽआशवःशुभ्राऽअसृग्रमिंदवः ॥
घ्नंतोविश्वाऽअपद्विषः ॥ पवमानादिवस्पर्यंतरिक्षादसृक्षत ॥
पृथिव्याअधिसानवि ॥ पुनानःसोमधारयेंद्रोविश्वाअपस्त्रिधः ॥
जहिरक्षांसिसुक्रतो ॥ अपघ्नन्त्सोमरक्षसोभ्यर्षकानिक्रदत् ॥
द्युमंतंशुष्ममुत्तमं ॥ अस्मेवसूनिधारयसोमदिव्यानिपार्थिवा ॥
इंदोविश्वानिवार्या ॥ ३५ ॥ वृषासोमद्युमाँऽअसिवृषादेववृष
व्रतः ॥ वृषाधर्माणिदधिषे ॥ वृष्णस्तेवृष्ण्यंशवोवृषावनंवृषामदः
सत्यंवृषन्वृषेदसि ॥ अश्वोनचक्रदोवृषासंगाइंदोसमर्वतः ॥ वि
नोरायेदुरोवृधि ॥ असृक्षतप्रवाजिनोगव्यासोमासोअश्वया ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्रासोवीर्याशवः ॥ शुंभमानाऋतायुभिर्मृज्यमानागभस्त्योः
॥ पवंतेवारेऽअव्यये ॥ ३६ ॥ तेविश्वादाशुषेवसुसोमादिव्या
निपार्थिवा ॥ पवंतामांतरिक्ष्या ॥ पवमानस्यविश्ववित्प्रतेसर्गा
ऽअसृक्षत ॥ सूर्यस्येवनरश्मयः ॥ केतुंकृण्वंदिवस्परिविश्वा
रूपाभ्यर्षसि ॥ समुद्रःसोमपिन्वसे ॥ हिन्वानोवाचमिष्यसिप
वमानविधर्मणि ॥ अक्रान्देवोनसूर्यः ॥ इंदुःपविष्टचेतनःप्रि
यःकवीनांमती ॥ सृजदश्वंरथीरिव ॥ २७ ॥ ऊर्मिर्यस्तेप
वित्रऽआदेवावीःपर्यक्षरत् ॥ सीदन्नृतस्ययोनिमा ॥ स
नोऽअर्षपवित्रऽआमदोयोदेववीतमः ॥ इंद्रविंद्रायपीतये ॥
इषेपवस्वधारयामृज्यमानोमनीषिभिः ॥ इंदोरुचाभिगाऽइहि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनानोवरिवस्कृध्यूर्जंजनायगिर्वणः ॥ हरेसृजानऽआशिरं ॥
पुनानोदेववीतयइंद्रस्ययाहिनिष्कृतं ॥ द्युतानोवाजिभिर्यतः ॥
॥ ३८ ॥ प्रहिन्वानासऽइंदवोऽच्छासमुद्रमाशवः ॥ धियाजूताऽअ
सृक्षत ॥ मर्मृजानासआयवोवृथासमुद्रमिंदवः ॥ अग्मन्नृतस्य
योनिमा ॥ परिणोयाह्यस्मयुर्विश्वावसून्योजसा ॥ पाहिनःशर्म
वीरवत् ॥ मिमातिवन्हिरेतशःपदंयुजानऽऋक्वभिः ॥ प्रयत्समु
द्रऽआहितः ॥ आयद्योनिंहिरण्ययमाशुर्ऋतस्यसीदति ॥ जहा
त्यप्रचेतसः ॥ ३९ ॥ आभिवेनाअनूषतेयक्षंतिप्रचेतसः ॥ मज्जं
त्यविचेतसः ॥ इंद्रायेंदोमरुत्वतेपवस्वमधुमत्तमः ॥ ऋतस्य
योनिमासदं ॥ तंत्वाविप्रावचोविदःपरिष्कृण्वंतिवेधसः ॥ संत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृजंत्यायवः ॥ रसंतामत्रोऽअर्यमापिबंतिवरुणःकवे ॥ पव
मानस्यमरुतः ॥ त्वंसोमविपश्चितंपुनानोवाचमिष्यसि ॥ इंदो
सहस्रभर्णसं ॥ ४० ॥ उतोसहस्रभर्णसंवाचंसोममखस्युवं ॥
पुनानऽइंदवाभर ॥ पुनानइंदवेषांपुरुहूतजनानां ॥ प्रियःसमुद्र
माविश ॥ दविद्युतत्यारुचापरिष्टोभंत्याकृपा ॥ सोमाःशुक्राग
वाशिरः ॥ हिन्वानोहितृभिर्यतआवाजंवाज्यक्रमीत् ॥ सीदंतोव
नुषोयथा ॥ ऋधक्सोमस्वस्तयेसंजग्मानोदिवःकविः ॥ पवस्वसू
र्योदृशे ॥ ४१ ॥ ॐ ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाऽअधि
विश्वेनिषेदुः ॥ यस्तंनवेदकिमृचाकरिष्यतियऽइत्तद्विदुस्तऽइमे
समासते ॥ इतिपवमानसूक्तेतृतीयोऽध्यायः ॥ ३ ॥ श्रीकृष्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्पणमस्तु ॥ ॥ हरिःॐम् ॥ हिन्वंतिसूरमुस्रयःस्वसा
रोजामयस्पतिं ॥ महामिंदुंमहीयुवः ॥ पवमानरुचारुचादेवो
देवेभ्यस्परि ॥ विश्वावसून्याविश ॥ आपवमानसुष्टुतिंवृष्टिंदेवे
भ्योदुवः ॥ इषेपवस्वसंयतं ॥ वृषाह्यसिभानुनाद्युमंतंत्वाहवा
महे ॥ पवमानस्वाध्यः ॥ आपवस्वसुवीर्यमिंदमानस्वायुध ॥
इहोष्विंदवागहि ॥ १ ॥ यदद्भिःपरिषिच्यसेमृज्यमानोगभस्त्योः
॥ द्रुणासधस्थमश्नुषे ॥ प्रसोमायव्यश्वदत्पवमानायगायत ॥
महेसहस्रचक्षसे ॥ यस्यवर्णमधुश्चुतंहरिंहिन्वंत्यद्रिभिः ॥ इंदु
मिंद्रायपीतये ॥ तस्यतेवाजिनोवयंविश्वाधनानिजिग्युषः ॥ स
खित्वमावृणीमहे ॥ वृषापवस्वधारयामरुत्वतेचमत्सरः ॥ वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वादधानऽओजसा ॥ २ ॥ तंत्वाधर्तारमोण्योः पवमानस्व
र्दृशं ॥ हिन्वेवाजेषुवाजिनं ॥ अयाचित्तोविपानयाहरिः पवस्व
धारया ॥ युजंवाजेषुचोदय ॥ आनइंदो महीमिषंपवस्वविश्व
दर्शतः ॥ अस्मभ्यंसोमगातुवित् ॥ आकलशाऽअनूषतेंद्रोधा
राभिरोजसा ॥ एंद्रस्यपीतयेविश ॥ यस्यतेमद्यंरसंतीव्रंदुहन्त्य
द्रिभिः ॥ सपवस्वाभिमातिहा ॥ ३ ॥ राजामेधाभिरीयतेपव
मानोमनावधि ॥ अंतरिक्षेणयातवे ॥ आनइंदोशतग्विनंगवां
पोषंस्वश्व्यं ॥ वहाभगत्तिमूतये ॥ आनःसोमसहोजुवोरूपंन
वर्चसेभर ॥ सुष्वाणोदेववीतये ॥ अर्षासोमद्युमत्तमोभिद्रो
णानिरोरुवत् ॥ सीदन्छ्येनोनयोनिमा ॥ अप्साइंद्रायवायवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरुणायमरुद्भ्यः ॥ मोमोअर्षतिविष्णवे ॥ ४ ॥ इषंतोका
यनोदधदस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणं ॥ येसोमा
सःपरावतियेऽअर्वावतिसुन्विरे ॥ येवादःशर्यणावति ॥ यऽआ
र्जीकेषुकृत्वसुयेमध्येपस्त्यानां ॥ येवाजनेषुपंचसु ॥ तेनोवृ
ष्टिंदिवस्परिपवंतामासुवीर्यं ॥ सुवानादेवासइंदवः ॥ पवंतेह
र्यतोहरिर्गृणानोजमदग्निना ॥ हिन्वानोगोरधित्वाचि ॥ ५ ॥
प्रशुक्रासोवयोजुवोहिन्वानासोनसप्तयः ॥ ॥ श्रीणानाअप्सु
मृंजत ॥ तंत्वासुतेष्वाभुवोहिन्विरेदेवतातये ॥ सपवस्वानया
रुचा ॥ आतेदक्षंमयोभुवंवन्हिंमद्यावृणीमहे ॥ पांतमापुरुस्पृ
हं ॥ आमंद्रमावरेण्यमाविप्रमामनीषिणं ॥ पांतमापुरुस्पृहं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरयिमासुचेतुनूमासुक्रतोतनष्वा ॥ पांतमापुरुस्पृहं ॥ ६ ॥
पवस्वविश्वचर्षणेभिविश्वानिकाव्या ॥ सखासखिभ्यऽईड्यः
॥ ताभ्यांविश्वस्यराजसियेपवमानधामनी ॥ प्रतीचीसोमत
स्थतुः ॥ परिधामानियानितेत्वंसोमासिविश्वतः ॥ पवमानऋ
तुभिःकवे ॥ पवस्वजनयन्निषोभिविश्वानिवार्या ॥ सखा
सखिभ्यऽऊतये ॥ तवशुक्रासोऽअर्चयोदिवस्पृष्ठेवितन्वते ॥ प
वित्रंसोमधामभिः ॥ ७ ॥ तवेमेसप्तसिंधवःप्रशिषंसोमसिस्रते ॥
तुभ्यंधावंतिधेनवः ॥ प्रसोमयाहिधारयासुतइंद्रायमत्सरः ॥
दधानोअक्षितिश्रवः ॥ समुत्वाधीभिरस्वरन्हिन्वतीःसप्तजामयः
विप्रमाजाविवस्वतः ॥ मृजंतित्वासमग्रुवोव्येजीरावधिष्वणि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेभोयद्दज्यसेवने ॥ पवमानस्यतेकवेवाजिन्त्सर्गाअसृक्षत ॥
अर्वंतोनश्रवस्यवः ॥ ८ ॥ अछाकोशंमधुश्चुतमसृग्रंवारेऽअव्य
ये ॥ अवावशंतधीतयः ॥ अछासमुद्रमिंदवोस्तंगावोनधेनवः ॥
अग्मन्नृतस्ययोनिमा ॥ प्रणइंदोमहेरणआपोअर्षंतिसिंधवः ॥
यद्गोभिर्वासायिष्यते ॥ अस्यतेसख्येवयमिंद्रस्त्वोतयः ॥
इंदोसाखित्वमुश्मसि ॥ आपवस्वगविष्टयेमहेसोमनृचक्षसे ॥
एंद्रस्यजठरेविश ॥ ९ ॥ महाँऽअसिसोमज्येष्ठउग्राणामिंदओ
जिष्ठः ॥ युध्वासंन्छश्वज्जिगेथ ॥ यउग्रेभ्यश्चिदोजीयान्छूरेभ्य
श्चित्छूरतरः ॥ भूरिदाभ्यश्चिन्मंहीयान् ॥ त्वंसोमसूरएषस्तोकस्य
सातातनूनां ॥ वृणीमहेसख्यायवृणीमहेयुज्याय ॥ अग्नऽआयूंषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव

॥३१॥

पवस॒ऽआसु॒वोर्ज॒मिषं॑चनः ॥ आ॒रेबा॑धस्वदु॒च्छुनां॑ ॥ अ॒ग्निर्ऋषि॒ः
पव॑मान॒ःपांच॑जन्यःपुरो॒हि॑तः ॥ तमीम॑हेमहाग॒यं ॥ १० ॥ अग्ने॒
पव॑स्व॒स्वपा॑ऽअस्मेवर्चः॒सुवी॒र्यं ॥ दध॑द्र॒यिंमयि॒पोषं॑ ॥ पव॑मा
नो॒ऽअति॒स्त्रिधो॒भ्यर्षा॑तिसु॒ष्टुतिं ॥ सूरो॒नवि॒श्वद॑र्शतः ॥ सम॑र्मृजा॒न
आयुभि॒ःप्रय॑स्वा॒न्प्रय॑सेहि॒तः ॥ इंदु॒रत्यो॑विचक्ष॒णः॥ पव॑मानऽऋ॒
तंबृ॒हच्छुक्रंज्योति॑रजीजनत् ॥ कृ॒ष्णातमां॑सि॒जंघ॑नत् ॥ पव॑मान
स्य॒जंघ्न॑तो॒हरे॑श्चंद्राअ॑सृक्षत ॥ जी॒राअ॑जि॒रशो॑चिषः ॥ ११ ॥ प
व॑मानेरथी॒तमः शु॒भ्रेभि॑ःशु॒भ्रशो॑स्तमः ॥ हरि॑श्चंद्रोम॒रुद्ग॑णः ॥
पव॑मानो॒व्य॑श्नवद्र॒श्मिभि॑र्वाज॒सात॑मः ॥ दध॑त्स्तो॒त्रेसु॒वीर्यं ॥ प्र
सु॑वा॒नइंदु॑रक्षाःप॒वित्र॒मत्य॒व्ययं॑ ॥ पु॒ना॒नइंदु॒रिंद्र॒मा ॥ ए॒षसोमो॒ऽ

मान.

॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधित्वा त्रिगर्वांक्रीळत्याद्रिभिः ॥ इंद्रमदायजोहुवत् ॥ यस्यते
द्युम्नवत्पयःपवमानाभृतंदिवः ॥ तेननोमृळजीवसे ॥ १२ ॥ त्वं
सोमासिधारयुर्मंद्रओजिष्ठोऽअध्वरे ॥ पवस्वमंहयद्रयिः ॥ त्वं
सुतोनृमादनोदधन्वान्मत्सरिंतमः ॥ इंद्रायसूरिरंधसा ॥ त्वंसु
ष्वाणोऽआद्रिभिरभ्यर्षकनिक्रदत् ॥ द्युमंतंशुष्ममुत्तमं ॥ इंदुर्हि
न्वानोऽअर्षतितिरोवाराण्यव्यया ॥ हरिर्वाजमचिक्रदद् ॥ इंदो
व्यव्यमर्षसिविश्वांसिसौभगा ॥ विराजान्त्सोमगोमतः ॥
॥ १३ ॥ आनइंदोशतग्विनंरयिंगोमंतमश्विनं ॥ भरासोमसह
स्रिणं ॥ पवमानासइंदवस्तिरःपवित्रमाशवः॥इंद्रयामेभिराशत॥
ककुहःसोम्योरसइंदुरिंद्रायपूर्व्यः ॥ आयुःपवतआयवे ॥ हिन्वंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तूरमुस्त्रयःपवमानंमधुश्चुतं ॥ अभिगिरासमस्वरन् ॥ अविताना
अजाश्वःपूषायामनियामनि ॥ आभक्षत्कन्यासुनः ॥ १४ ॥
अयंसोमःकपर्दिनेवृतंनपवतेमधु ॥ आभक्षत्कन्यासुनः ॥ अयं
तआघृणेसुतोनृतंमपवतेशुचि ॥ आभक्षत्कन्यासुनः ॥ वाचो
जंतुःकवीनांपवस्वसोमधारया ॥ देवेषुरत्नधाअसि ॥ आकल
शेषुधावतिश्येनोत्रमविगाहते ॥ अभिद्रोणाकनिक्रदत् ॥ परि
प्रसोमतेरसोसर्जिकलशेसुतः ॥ श्येनोनतक्तोअर्षति ॥ १५ ॥ प
वस्वसो-ममदयान्निंद्रायमधुमत्तमः ॥ असृग्रंदेववीतयेवाजयंतो
रथाऽइव ॥ तेसुतासोमदिन्तमाःशुक्रावायुमसृक्षत ॥ ग्राव्णातु
न्नोअभिष्टुतःपवित्रंसोमगच्छसि ॥ दधत्स्तोत्रेसुवीर्यं ॥ एषतुन्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आभिष्टुतःपवित्रमतिगाहते ॥ रक्षोहावारमव्ययम् ॥ १६ ॥ य
दंतियच्चदूरकेभयंविंदातिमामिह ॥ पवमानवितज्जहि ॥ पव
मानःसोऽअद्यनःपवित्रेणविचर्षणिः ॥ यःपोतासपुनातुनः ॥
यत्तेपवित्रमार्चिष्यग्नेवितततमंतरा ॥ ब्रह्मतेनपुनीहिनः ॥ यत्ते
पवित्रमर्चिषदग्नेतेनपुनीहिनः ॥ ब्रम्हसवैःपुनीहिनः ॥ उभाभ्यां
देवसवितःपवित्रेणसवेनच ॥ मांपुनीहिविश्वतः ॥ १७ ॥ त्रि
भिष्टेदेवसवितर्वर्षिष्ठैःसोमधामभिः ॥ अग्नेदक्षैःपुनीहिनः ॥
पुनंतुमांदेवजनाःपुनंतुवसवोधिया ॥ विश्वेदेवाःपुनीतमाजातवे
दःपुनीहिमा ॥ प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः ॥
॥ देवेभ्यउत्तमंहविः ॥ उपप्रियंपनिप्रतंयुवानमाहुतीवृधं ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव. ॥३४॥

गन्मबिभ्रतोनमः ॥ अलाय्यस्यपरशुर्ननाशतमापवस्वदेवसोम ॥ आखुंचिदेवदेवसोम ॥ यःपावमानीरध्येत्यृषिभिःसंभृतंरसं ॥ सर्वसपूतमश्नातिस्वदितंमातरिश्वना ॥ पावमानीर्योःअध्येत्यृषिभिःसंभृतंरसं ॥ तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकं ॥ १८ ॥ पावमानीस्वस्त्ययनीःसुदुघाहिघृतश्चुतः ॥ ऋषिभिःसंभृतोरसोब्राम्हणेष्वमृतंहितं ॥ पावमानीर्दिशंतुनऽइमंलोकमथोअमुं ॥ कामान्समर्धयन्तुनोदेवैर्देवीःसमाहिताः ॥ येनदेवाःपवित्रेणात्मानंपुनतेसदा ॥ तेनसहस्रधारेणपावमान्यःपुनंतुमां ॥ प्राजापत्यंपवित्रंशतोद्यामंहिरण्मयं ॥ तेनब्रम्हविदोवयंपूतंब्रह्मपुनीमहे ॥ दंद्रःपुनीती

मान. ॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहमापुनातुसोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणा
भिःपुनातुमाजातवेदामूर्जयंत्यापुनातु ॥ ऋषयस्तुतपस्तेपुःसर्वे
सर्गाजिगीषवः ॥ तपसस्तपसोग्रियंतुपावमानीर्ऋचोब्रावित् ॥
यन्मेगर्भेवसतःपापमुग्रंयज्जायमानस्यचकिंचिदन्यत् ॥ जात
स्यचयच्चापिचवर्धतोमेतत्पावमानीभिरहंपुनामि ॥ मातापित्रो
यन्नकृतंवचोमेयत्स्थावरंजंगममाबभूव ॥ विश्वस्यतत्प्रहषितंव
चोमेतत्पावमानीभिरहंपुनामि ॥ गोघ्नात्तस्करत्वात्स्त्रीवधाद्य
च्चकिल्बिषं ॥ पापकंचचरणेभ्यस्तत्पावमानीभिरहंपुनामि ॥
ब्रह्मवधात्सुरापानात्स्वर्णस्तेयाद्वृषळिगमनमैथुनसंगमात् ॥
गुरोर्दाराद्विगमनाच्चतत्पावमानीभिरहंपुनामि ॥ बालघ्नान्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृपितृवधाद्भूमितस्करात्सर्ववर्णगमनमैथुनसंगमात् ॥ पापे
भ्यश्च प्रतिग्रहात्सद्यः प्रहरति सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि
॥ क्रयविक्रयाद्योनिदोषाद्भक्षाद्भोज्यात्प्रतिग्रहात् ॥ असं
भोजनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि ॥ २ ॥ दुर्यष्टं दुर
धीतं पापं यच्चाज्ञानतो कृतं ॥ आयाचिताश्वासंयाज्यास्तत्पावमा
नीभिरहं पुनामि ॥ अमंत्रमन्नं यत्किंचिद्भूयते च हुताशने ॥ संव
त्सरकृतं पापं तत्पावमानीभिरहं पुनामि ॥ ऋतस्य योनयो मृतस्य
धाम विश्वादेवेभ्यः पुण्यगंधाः ॥ तान आपः प्रवहंतु पापं शुद्धा गच्छामि
सुकृतामुलोकं तत्पावमानीभिरहं पुनामि ॥ पावमानीः स्वस्त्ययं
नीर्याभिर्गच्छति नांदनं ॥ पुण्यांश्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पावमानीःपितृन्देवान्ध्यायेभ्यश्चसरस्वतीं ॥ पितृंस्तस्योपतिष्ठेत
त्क्षीरंसर्पिर्मधूदकं ॥ पावमानंपरंब्रह्मशुक्रंज्योतिःसनातनं ॥
ऋषींस्तस्योपपिष्ठेतत्क्षीरंसर्पिर्मधूदकं ॥ पावमानंपरंब्रह्मयेपठंति
मनीषिणः ॥ सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगाः ॥ दशो
त्तराण्यृचांश्चैवपावमानीःशतानिषट् ॥ एतज्जुह्वंजपेन्मंत्रंयो
रमृत्युभयंहरेत् ॥ शतधारमुत्समक्षीयमाणंविपश्चितंपितरंव
क्त्वानां ॥ मोळिंमदंतंपित्रोरुपस्थेतंरोद सीपिपृतंसत्यवाचं॥ ३ ॥
ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः ॥ यस्तं
नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमासते ॥ ॥ इति
पवमानसूक्तचतुर्थोध्यायः ॥ ४ ॥ श्रीगणेशायनमः ॥ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥३६॥

नतमंहोनदुरितंदेवासोअष्टमर्त्यं ॥ सजोषसोयमर्यमामित्रोनयं
तिवरुणोऽअतिद्विषः ॥ तद्धिवयंवृणीमहेवरुणामित्रार्यमन् ॥
येनानिरंहसोयूयंपाथनेथाचमर्त्यमतिद्विषः ॥ तेनूनंनोयमूतये
वरुणोमित्रोऽअर्यमा ॥ नयीष्ठाउनोनेषणिपर्षिष्ठाउनःपर्षण्यतिद्विषः
॥ यूयंविश्वंपरिपाथवरुणोमित्रोअर्यमा ॥युष्माकंशर्मणिप्रियेस्याम
सुप्रणीतयोतिद्विषः ॥ आदित्यासोऽअतिस्रिधोवरुणोमित्रोऽअर्यमा
॥उग्रंमरुद्भीरुद्रंहुवेमेंद्रमाग्निंस्वस्तयेतिद्विषः॥नितारऊषुणस्तिरोवरु
णोमित्रोऽअर्यमा ॥ अतिविश्वानिदुरितारानजानश्चर्षणीनामति
द्विषः ॥ शुनमस्मभ्यमूतयेवरुणोमित्रोऽअर्यमा ॥ शर्मयच्छंतुस
प्रथआदित्यासोयदीमहेऽअतिद्विषः ॥ यथाहत्यद्वसवोगौर्यांचि

मान

॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्पदिषितामर्मुंचतायजत्राः ॥ एवोष्व१स्मन्मुंचताव्यंहःप्रतार्य
मेप्रतरंनआयुः ॥ १ ॥ ॐ इतिवाइतिमेमनोगामश्वंसनुया
मिति ॥ कुवित्सोमस्यापामिति ॥ प्रवाताइवदोधतउन्मापीता
अयंसत ॥ कुवित्सोमस्यापामिति ॥ उन्मापीताअयंसतरथम
श्वाइवाशवः ॥ कुवित्सोमस्यापामिति ॥ उपमामतिरस्थित
वाश्वापुत्रमिवप्रियं ॥ कुवित्सोमस्यापामिति ॥ अहंतष्टेववंधुरं
पर्यचामित्दृदामतिं ॥ कुवित्सोमस्यापामिति ॥ नाहि
मेअक्षिपच्चनाछान्त्सुः पंचकृष्टयः ॥ कुवित्सोमस्यापामिति
॥ १ ॥ नहिमेरोदसीउभेअन्यंपक्षंचनप्रति ॥ कुवित्सो
मस्यापामिति ॥ अभिद्यांमहिनाभुवमभी३ मांपृथिवींमहीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ कुवित्सोमस्यापामिति ॥ हंताहंपृथिवीमिमांनिदधानी
हवेहवा ॥ कुवित्सो० ॥ ओषमित्पृथिवीमहंजंघनानीहवेहे
वा ॥ कुवित्सो० ॥ दिविमेअन्यःपक्षोधोअन्यमचीकृषं ॥ कु
वित्सो० ॥ अहमस्मिमहामहोभिनभ्यमुदीषितः ॥ कुवित्सो०
॥ गृहोयाम्यरंकृतोदेवेभ्योहव्यवाहनः ॥ कुवित्सोमस्या० ॥ २ ॥
अथवामनसूक्त ॥ ॐअस्यवामस्यपलितस्यहोतुस्तस्यभ्रातामध्यमोअस्त्यश्नः ॥ तृतीयोभ्रातावृतपृष्ठोअस्यात्रापश्यंविश्पतिंसप्तपुत्रं ॥ सप्तयुंजंतिरथमेकंचक्रमेकोअश्वोवहतिसप्तनामा ॥ त्रिनाभिचक्रमजरमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः ॥ इमंरथमधियेसप्ततस्थुःसप्तचक्रंसप्तवहंत्यश्वाः ॥ सप्तस्वसारोअभिसंन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वंतेयत्रगवांनिहितासप्तनाम ॥ कोद-दर्शप्रथमंजायमानमस्थन्वं
तंयदनस्थाबिभर्ति ॥ भूम्याअसुरसृगात्माक्वस्वित्कोविद्वां-समुप
गात्प्रष्टुमेतत् ॥ पाकःपृछामिमनसाविजानंदेवानामेनानिहिताप
दानि ॥ वत्सेबष्कयेधिसप्ततंतून्वितन्विरेकवयओतवाउ ॥ १ ॥
अविकित्वान्चिकितुषश्चिदत्रकवीन्पृ-छामिविद्मनेनविद्वान् ॥
वियस्तस्तंभषळिमारजांस्यजस्यरूपेकिमपिस्विदेकं ॥ इहब्रवी
तुयईमंगवेदास्यवामस्यनिहितंपदंवेः ॥ शीर्ष्णःक्षीरंदुह्रतेगावो
अस्यवव्रिंवसानाउदकंपदापुः ॥ मातापितरंमृतआबभाजधी
त्यग्रेमनसासंहिजग्मे ॥ सावीभत्सुर्गर्भरसानिविद्वानमस्वंतइदु
पवाकमीयुः ॥ युक्तामातासीद्धुरिदक्षिणायाअतिष्ठद्गर्भोवृजनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्वंतः ॥ अमीमिद्वत्सोअनुगामपश्यद्विश्वरूप्यांत्रिषुयोजनेषु ॥
तिस्रोमातॄस्त्रीन्पितॄन्बिभ्रदेकऊर्ध्वस्तस्थौनेमवग्लापयंति ॥ मंत्र
यंतेदिवोअमुष्यपृष्ठेविश्वाविदंवाचमाविश्वामिन्वां ॥ २ ॥ द्वादं
शारंनहितज्जरायवर्वर्तिचक्रंपरिद्यामृतस्य ॥ आपुत्राअग्नेमिथु
नासोअत्रसप्तशतानिविंशतिश्चतस्थुः ॥ पंचपादंपितरंद्वादशाकृ
तिंदिवआहुःपरेअर्धेपुरीषिणं ॥ अथेमेअन्यउपरेविचक्षणंसप्त
चक्रेषळरआहुरर्पितं ॥ पंचारेचक्रेपरिवर्तमानेतस्मिन्नातस्थुर्भु
वनानिविश्वा ॥ तस्यनाक्षस्तप्यतेभूरिभारःसनादेवनशीर्यतेस
नाभिः ॥ सनेमिचक्रमजरंविवावृतउत्तानायांदशयुक्तावहंति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यस्य चक्षूरजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ सा कृजा
नांसप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ॥ तेषामिष्टानि
विहितानि धामशस्त्रा रेजंते विकृतानि रूपशः ॥ ३ ॥ स्त्रियः
सतीस्ताँऽउ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदंधः ॥ कविर्यः पुत्रः
स ईमा चिकेत यस्ता वि जानात्स पितुष्पितासत् ॥ अवः परेण पर
एना वरेण पदा वत्सं बिभ्रती गौरुदस्थात् ॥ सा कद्रीची कं स्वि
द्धर्पराग्रात्का स्वित्सूते नाहियूथे अंतः ॥ अवः परेण पितरं यो अ
स्यानुवेद परएना वरेण ॥ कवीयमानः क इह प्रवोचद्देवं मनः कुतो
ऽअधि प्रजातं ॥ ये अर्वाचस्ताँऽउ परांच आहुर्ये परांचस्ताँऽउ अर्वा
चआहुः ॥ इंद्रश्च याच क्रथुः सोमतानि धुरा न युक्ता रजसो वहंति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते ॥ तयोरन्यःपि
प्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ॥ ४ ॥ यत्रासुपर्णा
अमृतस्यभागमनिमेषंविदथाभिस्वरंति ॥ इनोविश्वस्यभुवनस्य
गोपाःसमाधीरःपाकमत्राविवेश ॥ यस्मिन्वृक्षेमध्वदःसुपर्णा
निविशंतेसुवंतेचाधिविश्वे ॥ तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोनेशद्यः
पितरंनवेद ॥ यद्गायत्रेअधिगायत्रमाहितंत्रैष्टुबाद्वात्रैष्टुभंनिरतक्ष
त ॥ यद्वाजगज्जगत्याहितंपदंयइत्तद्विदुस्तेअमृतत्वमानशुः ॥
गायत्रेणप्रतिमिमीतेअर्कमर्केणसामत्रैष्टुभेनवाकं ॥ वाकेनवाकं
द्विपदाचतुष्पदाक्षरेणमिमतेसप्तवाणीः ॥ जगतासिंधुंदिव्यस्त
भायद्रथंतरेसूर्यंपर्यपश्यत् ॥ गायत्रस्यसमिधस्तिस्रआहुःस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोमन्हाप्ररिरिचेमहित्वा ॥ ५ ॥ उपह्वयेसुदुघांधेनुमेतांसुह
स्तोगोधुगुतदोहदेनां ॥ ॥ श्रेष्ठंसवंसवितासाविषन्नोभीद्धोघर्म
स्तदुषुप्रवोचं ॥ हिंकृण्वतीवसुपत्नीवसूनांवत्समिछंतीमनसा
भ्यागात् ॥ ॥ दुहामाश्विभ्यांपयोअघ्न्येयंसावर्धतांमहते
सौभगाय ॥ ॥ गौरमीमेदनुवत्समिषतंमूर्धानहिंङ्कृणोन्
वातवाउ ॥ सृक्वाणंघर्ममभिवावशानामिमातिमायुंपयतेपयो
भिः ॥ अयंसशिङ्तेयेनगौरभीवृतामिमातिमायुंध्वसनावधिश्रि
ता ॥ साचित्तिभिर्निहिचकारमर्त्यंविद्युद्भवंतीप्रतिवावमौहत ॥
अनछयेतुरगातुजीवमेजध्रुवंमध्यआपस्त्यानां ॥ जीवोमृतस्यचर
तिस्वधाभिरमर्त्योमर्त्येनसायोनिः ॥६ ॥ अपश्यंगोपामनिपद्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव.

॥४०॥

नमाचपराचपाथिभिश्चरंतं ॥ ससध्रीचीःसत्रिषूचीर्वसानआवरी
वर्तिभुवनेष्वंतः ॥ यइंचकारनसोअस्यवेदयइंददर्शहिरुगिन्नुत
स्मात् ॥ समातुर्योनापरिवीतोअंतर्बहुप्रजानि ऋतिमाविवेश ॥
द्यौर्मापिताजनितानाभिरत्रबंधुर्मेमातापृथिवीमहीयं ॥ उत्तान
योश्चम्वोर्योनिरंतरत्रापितादुहितुर्गर्भमाधात् ॥ पृछामित्वापरमं
तंपृथिव्याःपृछामियत्रभुवनस्यनाभिः ॥ पृछामित्वावृष्णोअश्व
स्यरेतःपृछामिवाचःपरमंव्योम ॥ इयंवेदिःपरोअंतःपृथिव्या
अयंयज्ञोभुवनस्यनाभिः ॥ अयंसोमोवृष्णोअश्वस्यरेतोब्रह्मायं
वाचःपरमंव्योम ॥ ७ ॥ सप्तार्धगर्भाभुवनस्यरेतोविष्णो
स्तिष्ठंतिप्रदिशाविधर्मणि ॥ तेधीतिभिर्मनसातेविपश्चितःपरिभुवः

मान.

॥४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिभवंतिविश्वतः ॥ नविजानामियदिवेदमस्मिनिण्यःसन्नंत्धो
मनसाचरामि ॥ यदामागन्प्रथमजाऋतस्यादिद्वाचोअंभुवेभाग
मस्याः ॥ अपाङ्प्राङेतिस्वधयागृभीतोमर्त्योमर्त्येनासयोनिः
॥ ताशश्वंताविषूचीनाविषूंतान्यन्यंचिक्युर्ननिचिक्युरन्यं ॥
ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः ॥ यस्तं
नवेदाकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमासते ॥ सूयव
साद्भगवतीहिभूयाअथोवयंभगवंतःस्याम ॥ अद्धितृणमघ्न्ये
विश्वदानींपिबशुद्धमुदकमाचरंती ॥ ८ ॥ गौरीर्मिमायस
लिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी ॥ अष्टापदीनवपदी
बभूवुषीसहस्राक्षरापरमेव्योमन् ॥ तस्याःसमुद्राअधिविक्षरंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनजीवंतिप्रदिशश्चतस्रः ॥ ततःक्षरत्यक्षरंतद्विश्वमुपजीवति ॥
शक्रमयंधुममारादपश्यंविषूवतापरएनावरेण ॥ उक्षाणंपृश्निमप
चंतवीरास्तानिधर्माणिप्रथमान्यासन् ॥ त्रयःकोशिनेऋतुथाविच
क्षतेसंवत्सरेवपतएकएषां ॥ विश्वमेकोअभिचष्टेशचीभिर्ध्राजिरे
कस्यद्दृशेनरूपं ॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्म
णायेमनीषिणः ॥ गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्या
वदंति ॥ इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान्
॥ एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः ॥ ९ ॥
कृष्णंनियानंहरयःसुपर्णाअपोवसानादिवमुत्पतंति ॥ तआववृ
त्रन्त्सदनादृतस्यादिद्घृतेनपृथिवीव्युद्यते ॥ द्वादशप्रधयश्चक्रमे

मान.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंत्रीणिनभ्यानिकडुनाचिकेत ॥ तास्मिन्त्साकंत्रिशतानशकं
वोर्पिताःषष्ठिर्नचलाचलासः ॥ यस्तेस्तनःशशयोयोमयोभू
र्येनविश्वापुष्यसिवार्याणि ॥ योरत्नधातमोविद्यःसुदत्रःसरस्वति
तमिहधातवेकः ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमा
न्यासन् ॥ तेहनांकमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥
समानमेतदुदकमुच्चैत्यवचाहभिः॥भूमिंपर्जन्याजिन्वंतिदिवंजिन्वं
त्यग्नयः ॥ दिव्यंसुपर्णंवायसंबृहंतमपांगर्भंदर्शतमोषधीनां ॥
अभीपतोवृष्टिभिस्तर्पयंतसरस्वंतमवसेजोहवीमि ॥ १० ॥
॥ अतोदेवाऽअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याःसप्तधा
मभिः ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूळ्हमस्यपांसुरे ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः ॥ अतोधर्माणिधारयन् ॥ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे ॥ इंद्रस्ययुज्यः सखा ॥ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते ॥ विष्णोर्यत्परमंपदं ॥ १ ॥ ॐ ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाऽअधिविश्वेनिषेदुः ॥ यस्तंनवेदकिमृचाकरिष्यतियऽइत्तद्विदुस्तइमेसमासते ॥ ॥ इतिपवमानपंचसूक्तसमाप्तः ॥ ॥

मुंबईतः—हें पुस्तक "नोटिव ओपिनियन" छापखान्यांत रंगो विनायक जामखेडकर व पुरुषोत्तमदास सुगंधी नाशीककर यांणीं छापविलें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।इति पवमानपंचसूक्त स०।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ गंगाष्टक प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ मानःशैलसुतासपत्नवसुधाशृंगारहारावलि, स्वर्गारोहणवैजयंतिभवतींभागीरथींप्रार्थये ॥ त्वत्तीरेवसतस्त्वदंबु पिबतस्त्वद्वीचिषुप्रेंखत, स्त्वन्नामस्मरतस्त्वदर्पितदृशःस्यान्मेशरी रव्ययः ॥१॥ त्वत्तीरेतरुकोटरांतरगतोगंगेविहंगोवरं, त्वन्नीरेनर कांतकारिणिवरंमत्स्योथवाकच्छपः ॥ नैवान्यत्रमदांधसिंधुरघटा संघट्टघंटारण, त्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥२॥ उलापक्षीतुरगउरगःकोपिवावारणोवा, वाराणस्यांजननमरणक्ले शदुःखासहिष्णुः ॥ नत्वंन्यत्रमविस्तरणार्किंकिणिक्वाणमिश्रं, वार स्त्रीभिश्चमरमरुतावीजितोभूमिपालः ॥ ३ ॥ कार्कैर्निष्कुषितंश्व भिःकवलितंगोमायुभिर्लुठितं, स्रोतोभिश्चलितंतटांबुलुलितंवीची भिरांदोलितम् ॥ दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानःकदा, द्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्येऽहंपरमेश्वरित्रिपथगेभागीरथिस्त्वंवपुः ॥ ४ ॥ अभिनवबिस
वल्लीपादपद्मस्यविष्णो, र्मदनमथनमौलेर्मालतीपुष्पमाला ॥ जय
तिजयपताकाकाप्यसौमोक्षलक्ष्म्या, क्षपितकालिकलंकाजान्हवी
नःपुनातु ॥ ५ ॥ एतत्तालतमालसालसरलव्यालोलवल्लीलता,
च्छन्नंसूर्यकरप्रतापरहितंशंखेंदुकुंदोज्ज्वलम् ॥ गंधर्वामरसिद्ध
किन्नरवधूत्तुंगस्तनास्फालितं, स्नानायप्रतिवासरंभवतुमेगांगंजलं
निर्मलम् ॥ ६ ॥ गांगंवारिमनोहारि, मुरारिचरणच्युतम् ॥ त्रि
पुरारिशिरश्चारि, पापहारिपुनातुमाम् ॥ ७ ॥ पापापहारिदुरिता
रितरंगधारि, शैलप्रचारिगिरिराजगुहाविदारि ॥ झंकारकारिहरि
पादरजोपहारि, गांगंपुनातुसततंशुभकारिवारि ॥ ८ ॥ गंगाष्ट
कंपठतियःप्रयतःप्रभाते, वाल्मीकिनाविरचितंशुभदंमनुष्यः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रक्षाल्यगात्रकलिकल्मषपंकमाशु, मोक्षंलभेत्पतनिनैवनरोभ
वाब्धौ ॥ ९ ॥ ॥ इतिश्रीवाल्मीकिनाविरचितगंगाष्टकंस्तो
त्रंसंपूर्णम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुंबईंत:—हें पुस्तक "नेटिवओपिनियन" छापखन्यांत रंगो विनायक जामखेडकर व पुरुषोत्तमदास सुगंधी नाशीककर यांणीं छापविलें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति गंगाष्टकं समाप्तं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथ द्वादशनमस्कार प्रा०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशायनमः ॥ अद्यपूर्वोच्चरितवर्तमानएवंगुणविशेषण
विशिष्टायांशुभपुण्यतिथौममआत्मनः श्रुतिस्मृतिपुराणोक्तफल
प्राप्त्यर्थं श्रीसवितासूर्यनारायणप्रीत्यर्थंद्वादशसंख्ययानमस्कारा
ख्यंकर्मकरिष्ये ॥ ध्यानं ॥ ध्येयःसदासवितृमंडलचक्रवर्त्ती
नारायणःसरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुंडलवान्कि
रीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ तेजोराशिंश्रियायुक्तंतप्त
कांचनसन्निभं ॥ किरीटिनंपद्मनेत्रंपद्मरागविभूषितं ॥ पद्मासनं
पद्मकरंपद्मगर्भदलद्युतिं ॥ सप्ताश्वरथमारूढंद्विभुजंवरदंरविं ॥
॥ ॐ मित्रायनमः ॥ ॐ रवयेनमः ॥ ॐ सूर्यायनमः ॥ ॐ
भानवेनमः ॥ ॐ खगायनमः ॥ ॐ पूष्णेनमः ॥ ॐ हिर
ण्यगर्भायनमः ॥ ॐ मरीचयेनमः ॥ ॐ आदित्यायनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ॐ सवित्रेनमः ॥ ॐ अर्कायनमः ॥ ॐ भास्करायनमः ॥
॥ आदित्यस्यनमस्कारंयेकुर्वंतिदिनेदिने ॥ जन्मांतरसहस्रेषुदा
रिद्र्यंनोपजायते ॥ अनेननमस्काराख्येनकर्मणाभगवान्सविता
सूर्यनारायणःप्रीयतांनमम ॥ अकालमृत्युहरणंसर्वव्याधिविनाश
नं ॥ सूर्यपादोदकंतीर्थंजठरेधारयाम्यहम् ॥ ॥ ॥

मुंबईतः—हें पुस्तक "नेटिवओपिनियन" छापखान्यांत
रंगो विनायक जामखेडकर व पुरुषोत्तमदास सुगंधी
नाशीककर यांणीं छापविलें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इति द्वादशनमस्कारस०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथ स्नानविधि प्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ना

॥१॥

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ नमा
मिगंगेतवपादपंकजंसुरासुरैर्वंदितदिव्यरूपं ॥ भक्तिंचमुक्तिंचददा
सिनित्यंभावानुसारेणसदानराणां ॥ १ ॥ दर्शनात्सर्वपापघ्नींस्प
र्शनान्मोक्षदायिनीम् ॥ स्नानेनमुक्तिदांपुण्यांभागीरथींनमाम्य
हम् ॥ २ ॥ अथसंकल्पः ॥ श्रीमन्महागणाधिपतयेनमः ॥
इष्टदेवताभ्योनमः ॥ कुलदेवताभ्योनमः ॥ ग्रामदेवताभ्योनमः॥
वास्तुदेवताभ्योनमः ॥ शचीपुरंदराभ्यांनमः ॥ उमामहेश्वराभ्यां
नमः ॥ कालकांपरशुरामेभ्योनमोनमः ॥ सर्वेभ्योदेवेभ्योनमो
नमः ॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः ॥ अविघ्नमस्तु ॥ सुमुखश्चै
कदंतश्चकपिलोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्ननाशोगणा
धिपः ॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिना

वि.

॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानियःपठेच्छृणुयादपि ॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥
संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ शुक्लांबरधरंदेवंशशिवर्णं
चतुर्भुजं ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ सर्वमंगलमां
गल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरीनारायणिनमो
स्तुते ॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलं ॥ येषांहृदिस्थोभ
गवान्मंगलायतनंहरिः ॥ तदेवलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदे
व ॥ विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि ॥ लाभ
स्तेषांजयस्तेषांकुतस्तेषांपराजयः॥ येषामिंदीवरश्यामोहृदयस्थो
जनार्दनः ॥ विनायकंगुरुंभानुंब्रह्माविष्णुमहेश्वरान् ॥ सरस्वतींप्र
णम्यादौसर्वकार्यार्थसिद्धये ॥ अभीप्सितार्थसिद्ध्यर्थंपूजितोयः
सुरासुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ सर्वेष्वारंभका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ना. ॥२॥

येषुत्रयास्त्रिभुवनेश्वराः ॥ देवादिशंतुनःसिद्धिंब्रह्मशानजनार्दनाः ॥
श्रीमद्भगवतोमहापुरुषस्याविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणो
द्वितीयेपरार्धेविष्णुपदेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेभरतव
र्षेभरतखंडेजंबुद्वीपेदंडकारण्येदेशेगोदावर्याःदक्षिणेतीरेकृष्णावे
ण्ययोःउत्तरेशालिवाहनशकेबौद्धावतारेरामक्षेत्रेरामरामाश्रमेअ
स्मिन्वर्तमाने अमुकनामसंवत्सरे अमुकअयने अमुकऋतौ अ
मुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अद्यादिवस
नक्षत्रं विष्णुदिवसनक्षत्रे विष्णुमहानक्षत्रे विष्णुस्थेवर्तमाने
चंद्रे विष्णुस्थे सूर्ये विष्णुस्थेदेवगुरौ शेषेषुग्रहेषु सत्सु एवं गुण
विशेषण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुति
स्मृतिपुराणोक्त फलप्राप्त्यर्थं कायिक वाचिक मानसिक

वि. ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सांसर्गिक ज्ञाताज्ञात स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापीत सकलपाप
क्षयार्थंगंगाभागीरथीतीर्थेस्नानमहंकरिष्ये ॥ आपोहिष्ठामयोभुवः
स्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्त
स्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्य
क्षयायजिन्वथ ॥ अपोजनयथाचनः ॥ आपोपाइद ँ सार्वविश्वा
भूतान्यापःप्राणावाआपःपशवआपोन्नमापोमृतमापःसम्राडापोवि
राडापः स्वराडापः छन्दां ँ स्यापोज्योती ँ ष्यापोयजू ँ ष्यापः स
त्यमापः सर्वादेवताआपोभूर्भुवःसुवरापओम् ॥ स्नानंकृत्वा ॥
इमंमेगंगेयमुनेसरस्वतिशुतुद्रिःस्तोमंसचतारुपेष्ण्या ॥ असि
क्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ अघमर्षणं ॥
ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्र्यजायततः समु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ना. ॥३॥

द्रोऽअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोऽअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः ॥ इतित्रिरावृत्याअघमर्षणंकुर्यात् ॥ अथअर्घ्यमंत्राः ॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेकेशवानंतगृहाणार्घ्यंनमोस्तुते ॥ एहिसूर्यसहस्रांशोतेजोराशिजगत्पते ॥ अनुकंपयमांभक्त्यागृहाणार्घ्यंनमोस्तुते ॥ ब्रह्मकमंडलोद्भूतेगंगेत्रिपथगामिनी ॥ त्रैलोक्यवंदितेदेविगृहाणार्घ्यंनमोस्तुते ॥ ३ ॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ योसौसर्वगतोविष्णुश्चित्स्वरूपीजनार्दनः ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयः ॥ शरीरेजर्जरेभूतेव्याधिग्रस्तेकलेवरे ॥ औषधंजान्हवी

वि. ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोयंवैद्योनारायणोहरिः ॥ पापोहंपापकर्माहंपापात्मापापसंभवः ॥
त्राहिमांकृपयागंगेसर्वपापहराभवः ॥ स्नानांगतर्पणंकुर्यात् ॥ ब्र
ह्मादयोयेदेवाः तांदेवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि ॥ भुवर्देवां
स्तर्पयामि ॥ स्वर्देवांस्तर्पयामि ॥ भूर्भुवःस्वर्देवांस्तर्पयामि ॥
निवीती ॥ तान्ऋषींस्तर्पयामि ॥ भूर्ऋषींस्तर्पयामि ॥ भुवर्ऋषीं
स्तर्पयामि ॥ स्वर्ऋषींस्तर्पयामि ॥ भूर्भुवःस्वर्ऋषींस्तर्पयामि ॥
सव्येनवाअपसव्येन ॥ तान्पितॄंस्तर्पयामि ॥ भूःपितॄंस्तर्पयामि
भुवःपितॄंस्तर्पयामि ॥ स्वःपितॄंस्तर्पयामि ॥ भूर्भुवःस्वःपितॄंस्तर्पया
मि ॥ २ ॥ इतिस्नानविधिः समाप्तः ॥ ॥ ॥ ॥ ॥

मुंबईत :—हें पुस्तक "नेटिव ओपिनियन" छापखान्यांत रंगो विनायक
जामखेडकर व पुरुषोत्तमदास सुगंधी नाशीककर, यांणीं छापविलें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इति स्नानविधिः समाप्तः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथ महा० प्रा०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म० १

श्रीगणेशायनमः ॥ हरिः ॐ ॥ अथातःपंचांगरुद्राणन्यासपूर्वं
कंजपहोमार्चनविधिंव्याख्यास्यामः ॥ ॐयातेरुद्रशिवातनूरघोरा
पापकाशिनी ॥ तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहि ॥
शिखायैनमः ॥ ॐअस्मिन्महत्यर्णवे तरिक्षभवाअधि ॥ तेषां
सहस्रयोजनेवधन्वानितन्मासि ॥ शिरसेस्वाहा ॥ ॐ सहस्राणि
सहस्रशोयेरुद्राअधिभूम्यां ॥ तेषांसहस्रयोजनेवधन्वानितन्म
सि ॥ ललाटायनमः ॥ ॐहंसःशुचिषद्वसुरंतरिक्षसद्धोतावे
दिषदातिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋ
तजाअद्रिजाऋतंबृहत् ॥ भ्रूमध्यायनमः ॥ ॐत्र्यंबकंयजामहे

प्र० १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ ने
त्राभ्यांनमः ॥ ॐ नमःस्रुत्यायचपथ्यायच ॥ कर्णाभ्यांनमः ॥
मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरा
न्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ नासिकायैनमः
॥ ॐ अवतत्यधनुस्त्वं सहस्राक्षशतेषुधे ॥ निशीर्यशल्यानां
मुखाशिवोनःसुमनाभव ॥ मुखायनमः ॥ ॐ नीलग्रीवाः शि
तिकंठाः शर्वाअधः क्षमाचराः ॥ तेषांसहस्रयोजनेबधन्वानित
न्मासे ॥ कंठायनमः ॥ ॐ नीलग्रीवाः शितिकंठादिवं रुद्राउ
पश्रिताः ॥ तेषांसहस्रयोजनेबधन्वानितन्मासि ॥ उपकंठायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
२

॥ ॐ नमस्तेअस्त्वायुधायानाततायधृष्णवे ॥ उभाभ्यामुततेन
मोबाहुभ्यं तवधन्वने ॥ बाहुभ्यांनमः ॥ ॐ योतहेतिर्मिढुष्टमह
स्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ उपे
बाहुभ्य मनः ॥ ॐ येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः ॥ ते
षांसहस्र योजनेवधन्वानितन्मसि ॥ हस्ताभ्यांनमः ॥ ॐ स
द्योजातं प्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभव
स्वमांभवोद्भवायनमः ॥ अंगुष्ठाभ्यांनमः ॥ वामदेवायनमोज्येष्ठाय
नमः श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमोबल
विकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोम

प्र०
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोन्मनायनमः ॥ तर्जनीभ्यांनमः ॥ ॐ अघोरेभ्योथघोरेभ्यो
घोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ म
ध्यमाभ्यांनमः ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमाहि ॥ त
न्नोरुद्रःप्रचोदयात् ॥ अनामिकाभ्यांनमः ॥ ॐ ईशानः सर्व
विद्यानामीश्वरः सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधि पतिर्ब्रह्माशिवो
मेअस्तुसदाशिवोम् ॥ कनिष्ठिकाभ्यांनमः ॥ ॐ नमोवःकिरि
केभ्योदेवानाꣳहृदयेभ्यः ॥ हृदयायनमः ॥ ॐ नमोगणेभ्योग
णपतिभ्यश्चवोनमः॥पृष्ठ्यैनमः ॥ॐ नमोहिरण्यबाहवेसेनान्येदि
शांचपतयेनमः॥पार्श्वाभ्यांनमः॥ॐविज्यंधनुः कपर्दिनोविशल्यो
बाणवाꣳउत॥ अनेशंनः स्येषवआभुरस्यनिषंगथिः॥जठरायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
३

ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेकआसीत्॥ सदा
धारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥नाभ्यै०॥ ॐमीढुष्टम
शिवतमाशिवोनःसुमनाभव। परमेवृक्षआयुधंनिधायकृत्तिंवसानआचर
मिनाकंबिभ्रदागहि ॥ कर्व्यैनमः ॥ ॐयेभूतानामधिपतयो
विशिखासः कपर्दिनः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि
॥ गुत्स्यायनमः ॥ साशिराजातवेदाः ॥ अक्षरं ब्रह्मसंमितं
॥ वेदानाꣳशिरउत्तमं ॥ जातवेदसेशिरसामाता ॥ स्वयंब्रह्म
भूर्भुवः सुवरोम् ॥ जातवेदसेसुनवामसोममरातियतोनिदहा
ति वेदाः ॥ सनः पर्षदतिदुर्गाणिविश्वानावेवासंधुदुरितात्याग्निः

प्र०
३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेसुजुष्टां ॥ दुर्गांदेवीं
शरणमहंप्रपद्येसुतरसितरसेनमः ॥ अग्नेत्वंपारयानव्यो अस्मान्
स्वस्तिभिरतिदुर्गाणिविश्वा ॥ पूश्चपृथ्वीबहुलानउर्वीभवातोकाय
तनयायशंयोः ॥ विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिप
र्षि ॥ अग्नेअत्रिवन्नमसागृणानोस्माकंबोध्यवितातनूनां ॥ पृतना
जितःसहमानमुग्रमग्निं हुवेमपरमात्सधस्थात् ॥ सनः पर्षदतिदु
र्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निःअपानायनमः॥ ॐमानोमहां
तमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं ॥ मानोवधीःपितरंमो
तमातरंप्रियामानस्तनुवोरुद्ररीरिषः ॥ ऊरुमध्यायनमः ॥ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म० ४

एषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजवतोतीह्यवततधन्वापिना
कहस्तःकृत्तिवासाः ॥ जानुभ्यांनमः ॥ ॐ सꣳसृष्टाजित्सोमपा
बाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता ॥ बृहस्पतेपरिदीयारथेनरक्षोहा
मित्राꣳअपबाधमानः ॥ जंघाभ्यांनमः ॥ ॐ विश्वं
भूतंभुवनंचित्रं बहुधाजातंजायमानं चयत् ॥ सर्वोह्येष
रुद्रस्तस्मैरुद्रायनमोअस्तु ॥ गुल्फाभ्यांनमः ॥ ॐ येपथांपथिरक्षं
यएलबृदायव्युधाः ॥ तेषांꣳसहस्रयोजनेवधन्वानितन्मासे ॥ पा
दाभ्यांनमः ॥ ॐ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अ
हीꣳश्चसर्वाञ्जंभयन्सर्वाश्चयातुधान्यः ॥ कवचायनमः ॥

प्र० ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमोबिल्मिनेचकवचिनेच ॥ उपकवचायनमः ॥ ओंनमोअस्तु
नीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेअस्यसत्वानोहंतेभ्यो
करंनमः ॥ तृतीयनेत्रायनमः ॥ ॐ प्रमुंचधन्वनस्त्वमुभयोरार्त्नि
योर्ज्यां ॥ याश्चतेहस्तइषवः पराताभगवोवप ॥ अस्त्रायनमः ॥
ॐ यएतावंतश्चभूयां ः सश्चदिशोरुद्राविंतन्वते ॥ तेषां ः सह
स्रयोजनेवधन्वानितन्मसि ॥ इतिदिग्बंधः ॥ ॐ नमोभगवतेरु
द्रायेतिनमस्कारंन्यसेत् ॥ ॐ मूर्ध्नेनमः ॥ ॐ नंनासिकायै
नमः ॥ ॐ लंललाटायनमः ॥ ॐभं मुखायनमः ॐगं कं
ठायनमः ॥ ॐवं हृदयायनमः ॥ ॐतें दक्षिणहस्तायनमः ॥ ओं
स्वामहस्तायनमः ॥ ॐद्रां नाभ्यैनमः ॥ ओंयं पादाभ्यांनमः ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्व
मांभवोद्भवायनमः॥पादाभ्यांनमः॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठा
यनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमो
बलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः
॥ ऊरुमध्यायनमः ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥
सर्वेभ्यःसर्वशर्वेभ्यो नमस्तेअस्तुरुद्ररूपेभ्यः ॥हृदया० ॐतत्पुरुषाय
विद्महेमहादेवायधीमहि॥तन्नोरुद्रःप्रचोदयात्॥मुखायनमः॥ईशानः
सर्वविद्या नामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवो
मेअस्तुस दाशिवोम् ॥ओं शिरसेस्वाहा॥ ॐ हंसायनमः ॥ ॐ
परमहंसायनमः ॥ हंसंहंसेतियोब्रूयात्धंसोनामसदाशिवः ॥ एवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यासावीर्धिंकृत्वाततःसंपुटमारभेत् ॥ त्रातारमिंद्रमवितारमिंद्रं हवे
हवेसुहवं शूरमिंद्रं ॥ हुवेनुशक्रंपुरुहूतमिंद्रं स्वास्तिनोमघवाधात्विंद्रः
ललाटस्थानेइंद्रायनमः ॥ ॐ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडो
वयासिसीष्ठाः ॥ यजिष्ठोवन्हितमःशोशुचानोविश्वद्वषाः सिप्रमुमु
ग्ध्यस्मत् ॥ अग्नयेनमः ॥ ॐ सुगंनःपंथामभयंकृणातुयस्मिःक्ष
त्रयमएतिराजा ॥ यस्मिंनेनमश्यंषिचतदेवास्त्वदस्यचित्रः हविषा
यजाम ॥ यमायनमः ॥ ओं असुन्वंतमयंजमानमिछस्तेनस्येत्यां
तस्करस्यान्वेषि ॥ अन्यमस्यदिछसातइत्यानमोदेविनिर्ऋतेतुश्यम
स्तु ॥ निर्ऋतये० ॥ ओं तत्वायामिब्रह्मणावंदमानस्तदाशास्तेय
यजमानोहविर्भिः ॥ अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
६

षीः ॥ वरुणाय० ॥ आनोनियुद्भिः शतिनीभिरध्वरं सहस्रिणी
भिरुपयाहियज्ञं ॥ वायोअस्मिन्हाथिषिमादयस्वयूयंपातःस्वास्तिभिः
सदानः ॥ वायवेनमः ॥ ॐवयंसोमव्रतेतव मनस्तनूषुबिभ्र
तः ॥ प्रजावंतःसचेमाहि ॥ सोमाय० ॥ ॐअस्मरुद्रामेहनापव
तासोवृत्रहत्येभरहूतौसजोषाः ॥ यःशंसतेस्तुवतेधायिपज्रइंद्रं
ज्येष्ठाअस्मांअवंतुदेवाः ॥ तमीशानंजगतस्तस्थुषस्पतिंधियांजिन्व
मवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः
स्वस्तये ॥ एकादशरुद्रेभ्योनमः ॥ स्योनापृथिवीभवानृक्षरानिवे
शनी ॥ यच्छानःशर्मसप्रथाः ॥ भूम्यैनमः ॥ ॐएतत्सपुट

प्र०
६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिंद्रादीदिक्षुविन्यस्येवात्मानिरोद्रीकरणंकृत्वा ॥ त्वꣳ स्थिगतैःपा
पैःप्रमुच्यसर्वभूतेष्वपराजितोभवति ॥ ततोयक्षराक्षसगंधर्वभूतप्रे
तपिशाचयमदूतशाकिनीडाकिनीसर्पश्वापदतस्करादुपद्रवाद्युपघा
ताः सर्वेज्वलंतंपश्यतु ॥ मांꣳ रक्षंतु ॥ यजमानꣳरक्षंतु ॥
मनोज्योतिर्जुषतामाज्यंविच्छिंतंयज्ञꣳसमिमंदधातु ॥ याइष्टाउ
षेसीनवुचश्चताःसंदधामिहविषाघृतेन ॥ गुह्यायनमः ॥
अबोध्यग्निःसमिधाजनानं प्रतिधेनुमिवायतीमुषासं ॥ यव्हाइवप्र
वयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ ॥ अग्नयेनमः ॥ ओं
मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृआजातमग्निं॥ कविंसम्राजमति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म० ७

थिजनानामासंनापात्रंज नयंतदेवाः॥हृदयायनमः॥मर्माणितेवर्माभि
श्छादयामिसोमस्त्वाराजामृतेनाभिवस्तां ॥ उरोर्वरियोवरिवस्तेअस्तु
जयंतत्वामनुमदंतिदेवाः ॥ मुखायनमः ॥ जातवदायदिवापाष
कोसि ॥ वैश्वानरोयादिवावैद्युतोसि ॥ शंप्रजाभ्योयजमानाय
लोकं ॥ उर्जपृष्टदददभ्यावृत्स्व ॥ शिरसेस्वाहा ॥ ब्रह्मा
त्मन्वदसृजत ॥ तदकामयत ॥ समात्मनापद्ययेति ॥ आ
त्मंआत्मनियामंत्रयत ॥ तस्मैदशम॰हूतःप्रत्यश्रृणोत् ॥ स
दशहूतोभवत् ॥ दशहूतोवैनामैषः ॥ तंवाएनंदशहूतं॰संतं
॥ दशहोतेत्याचक्षतेपराक्षणं ॥ परोक्षप्रियाइवहिदेवाः ॥ आ
त्मंनात्मांनियामंत्रय ॥ तस्मैसप्तम॰हूतःप्रत्यश्रृणोत् ॥ ससप्तहू

प्र० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोभवत् ॥ सप्तहूतोहवैनामैषः ॥ तंवाएतंः सप्तहूतः संतं ॥
दशहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ आत्मंना
त्मांनित्यामंत्रय ॥ तस्मैसप्तम हूतःप्रत्यशृणोत् ॥ ससप्तहुतोभ
वत् ॥ सप्तहुतोहवैनामैषः ॥ तंमाएतं सप्तहूत संतं ॥ स
प्तहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ आत्मां
नात्मांनित्यामंत्रयत ॥ तस्मैषष्ठः हूतःप्रत्यशृणोत्सषष्ठतोभगवत्
॥ षष्ठतोहवैनामैषः ॥ तंवाएतंः षष्ठत संतं ॥ षष्ठोत्याचक्षते प
रोक्षेणाय ॥ परोक्ष प्रियाइवहिदेवः ॥आत्मंनात्मांनित्यामंत्रयत ॥
तस्मैपंचम हूतः प्रत्यशृणोत् ॥ सपंचहूतोभवत् ॥ पंचहूतो हवै
नामैषः ॥ तंवाएतं पंचहूतः संतं ॥ पंचहोतेत्याचक्षतेपरोक्षेण ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म० ८

परोक्षप्रियाइवहिदेवाः ॥ आत्मनात्मानित्यामंत्रयत ॥ तस्मैचतुर्थं
हूत ँहूतः प्रत्यशृणोत् ॥ सचतुर्होतोभवत् ॥ चतुर्हूतोहवैनामेषः ॥ तंवाए
त ँचतुर्हूतं ँसंतं ॥ चतुर्होतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइव
हिदेवाः ॥ तमब्रवीत् ॥ त्वंवैमेनेदिष्टं ँहूतःप्रत्यश्रौषीः ॥
त्वंयनानाख्यातारइति ॥ तस्मान्नहैनाँश्चतुर्होतारइत्याचक्षते ॥
तस्माच्छुश्रूषुःपुत्राणाँहृदयतमः ॥ नेदिष्टोहृदयतमनेदिष्टोब्रह्म
णोभवति ॥ यएवंवेद ॥ ॐयज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यत
थैवैति ॥ दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनःशिवसंकल्पमस्तु ॥
येनकर्माण्यपसामनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः ॥ यदपूर्वंय

प्र० ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मंमंतः प्रजानांतन्मेमनः शिवसंकल्पमस्तु ॥ यत्प्रजानमुतचेतोधृ
तिश्चयज्योतिरंतरमृतंप्रजासु ॥ यस्मान्नऋतेकिंचनकर्मक्रियतेत
न्मेमनः शिवसंकल्पमस्तु ॥ येनेदंभूतंभुवनंविष्यत्परिगृहितममृतेन
संवं ॥ येनयज्ञस्त्रायतेसप्तहोतातन्मेमनः शिवसंकल्पमस्तु ॥ य
स्मिनृचःसामयजूंषियस्मिन्प्रतिष्ठारथनाभाविवाराः ॥ यस्मिश्चि
त्तं सर्वमोतंप्रजानांतन्मेमनः शिवसंकल्पमस्तु ॥ सुषारथिरश्वानिवयं
मंमनुष्यान्ननीयतेभीशुभिर्वाजिनइव ॥ त्दत्प्रतिष्ठंयदजिरंयविष्ठंत
न्मेमनः शिवसंकल्पमस्तु ॥ शिवसंकल्पत्ददयायनमः ॥ ॐ सह
स्त्रशीर्षापुरुषः सहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्द
शांगुलं ॥ पुरुषएवेदं सर्वं यद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०

॥ यदन्नेनातिरोहति ॥ एतावानस्यमहिमा ॥ अतोज्यया॑श्चपू
रुषः ॥ पादोस्यविश्वाभूतानि ॥ त्रिपादस्यामृतंदिवि ॥ त्रिपा
दूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्व॑व्यक्रामत् ॥
साशनानशने अभि ॥ तस्माद्विराडजायत ॥ विराजो अधिपूरु
षः ॥ सजातो अत्यरिच्यत ॥ पश्चाद्भूमिमथोपुरः॥यत्पुरुषेणहवि
षा ॥ देवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं ॥ ग्रीष्मइध्मः श
रद्धविः॥सप्तास्यासन्परिधयः॥त्रिःसप्तसमिधःकृताः॥देवायद्ज्ञंतन्वा
नाअबध्नन्पुरुषंपशुं ॥ तंयज्ञंबर्हिषिप्रौक्षन्॥ पुरुषंजातमग्रतः ॥ ते
नदेवाअयजंत ॥ साध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥

प

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संभृतंपृषदाज्यं ॥ पशूंतां श्चक्रेवायव्यान् ॥ आरण्यानग्राम्या
श्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ ऋचःसामानिजज्ञिरे ॥ छंदांसि
जज्ञिरेतस्मात् ॥ यजुस्तमादजायत ॥ तस्मादश्वाअजायंत ॥ ये
केचोभयादतः ॥ गावोहजज्ञिरेतस्मात् ॥ तस्माज्जाताअजावयः॥
यत्पुरुषंव्यदधुः ॥ कतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहु ॥
कावूरूपादावुच्येते ॥ ब्राह्मणोस्यमुखमासीत ॥ बाहूराजन्यःकृतः॥
उरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ॥ चंद्रमामनसोजातः ॥
चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत॥
नाभ्याआसीदंतरिक्षं ॥ शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म० १० श्रोत्रात् ॥ तथा लोकां अकल्पयन् ॥ वेदाहमेतं पुरुषं महांतं ॥ आदि
त्यवर्णं तमसस्तु पारे ॥ सर्वाणि रूपाणि विचित्य धीरः ॥ नामा
नि कृत्वा निभवदन्यदास्ते ॥ धाता पुरस्ताद्यमुदाजहार ॥ श
क्रः प्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवं विद्वानमृत इह भवति ॥ ना
न्यः पंथा अयनाय विद्यते ॥ यज्ञेन यज्ञमयजंत देवाः ॥ तानि ध
र्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचंते ॥ यत्र पूर्वे सा
ध्याः संति देवाः ॥ शिरसे स्वाहा ॥ अद्भ्यः संभूतः पृथिव्यै रसाच्च
विश्वकर्मणः समवर्तताधि ॥ तस्य त्वष्टा विदधद्रूपमेति ॥ तत्पुरु
षस्य विश्वमाजानमग्रे ॥ वेदाहमेतं पुरुषं महांतं ॥ आदित्यवर्णं तम
सः परस्तात् ॥ तमेवं विद्वानमृत इह भवति ॥ नान्यः पंथा विद्यते यना

प्र० १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्य ॥ प्रजापतिश्चरति गर्भे अंतः ॥ अजायमानो बहुधा विजायते ॥
तस्य धीराः परिजानंति योनिं ॥ मरीचीनां पदमिच्छवयसः ॥ यो देवे
भ्य आतपति ॥ यो देवानां पुरोहितः ॥ पूर्वो यो देवेभ्यो जातः ॥
नमो रुचाय ब्राह्मये ॥ रुचं ब्राह्मं जनयंतः ॥ देवा अग्रे तदब्रुवन् ॥
यस्त्वेवं ब्राह्मणो विद्यात् ॥ तस्य देवा असन्वशे ॥ ह्रीश्च ते लक्ष्मीश्च
पत्न्यौ ॥ अहोरात्रे पार्श्वे । नक्षत्राणि रूपं ॥ अश्विनौ व्यात्तं ॥
इष्टं मनीषाणं ॥ अमुं मनीषाणं ॥ सर्वं मनीषाणं ॥ शिखायै वषट् ॥
आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनां ॥ संक्रंद
नो निमिषे एकवीरः शतं सेना अजयत्साकमिंद्रः ॥ संक्रंदनेनानिमिषे
णा जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ॥ तदिंद्रेण जयत तत्सहध्वयु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
११

धोनरइषुहस्तेनवृष्णा ॥ सइषुहस्तैःसनिषंगिभिर्वशीसꣳसृष्टासयुध
इंद्रोगणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता
॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्रांअपबाधमानः ॥ प्रभं
जन्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यवितारथानां ॥ गोत्राभिदंगो
त्राभिदंगोत्विदंवज्रबाहुजंयतमज्मप्रमृणततमोजसा ॥ ओम॑सजाता
अनुवीरयध्वमिंद्रꣳसखायोअनुसंरभध्वं ॥ बलविज्ञायस्थविरःप्र
वीरःसहस्वान्वाजीसहमानउग्रः ॥ अभिवीरोअभिसत्वासहोजाजै
त्रमिंद्ररथमातिगोवित् ॥ अभिगोत्राणिसहसागाहमानोदयोवीरः
शतमन्युरिंद्रः ॥ दुश्चवनः पृतनाषाडयुध्योस्माकंसेनाअवतुप्र
युत्सु ॥ इंद्रआसांनेतावृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः ॥ दे

प्र०
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसेनानामभिभंजतीनांजयंतीनांमरुतांयंत्वग्रं ॥ इंद्रस्यवृष्णोवरु
णस्यराज्ञआदित्यानांमरुतांशर्धउग्रं ॥ महामनसांभुवनच्यवानां
घोषोदेवानांजयतामुदस्थात् ॥ अस्माकमिंद्रःसमृतेषुध्वजेस्वस्माकं
याइषवस्थाजयंतु ॥ अस्माकंवीराउत्तरेभवंत्वस्मां उदेवाअवताहे
वेषु ॥ उत्धर्षयमवन्नायुधान्युत्सत्वनांमामकानांमनांसि ॥ उ
द्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयंतुघोषाः ॥ उपप्रेतजय
तानरस्थिराबःसंतुबाहवः॥इंद्रावःशर्मयच्छत्वनाधृष्यायथासथ॥अ
वसृष्टापरापतशरव्येब्रह्मशांसिते ॥ गच्छामित्रान्प्रपद्यस्वमामीषांकं
चनोच्छिषः ॥ मर्माणितेवर्मणांछादयामिसोमस्त्वाराजामृतेनानु
वस्तां ॥ उरोर्वरीयोवरुणस्ते कृणोतुजयंतंत्वामनुमदातेदेवाः ॥ यन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
१२

बाणाः संपातीति कुमाराविशिखाइव ॥ इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयच्छतु ॥ कवचायहुं ॥ त्वमग्नेरुद्रोअसुरोमहोदिवः ॥ त्वंशर्धोमारुतंपृक्षईशिषे ॥ त्वंवातैररुणैर्यासिशंगयः ॥ त्वंपूषाविदधुतःपासिनुत्मना ॥ देवादेवेषुश्रयध्वं ॥ प्रथमाद्वितीयेषुश्रयध्वं ॥ द्वितीयास्तृतीयेषुश्रयध्वं ॥ तृतीयाश्चतुर्थेषुश्रयध्वं ॥ चतुर्थीः पंचमेषुश्रयध्वं ॥ पंचमाषष्ठेषुश्रयध्वं ॥ षष्ठाः सप्तमेषुश्रयध्वं ॥ सप्तमाअष्टमेषुश्रयध्वं ॥ अष्टमानवमेषुश्रयध्वं ॥ नवमादशमेषुश्रयध्वं ॥ दशमाएकादशेषुश्रयध्वं ॥ एकादशाद्वादशेषुश्रयध्वं ॥ द्वादशास्त्रयोदशेषुश्रयध्वं ॥ त्रयोदशाश्चतुर्दशेषुश्रयध्वं ॥चतुर्दशाः पंचदशेषुश्रयध्वं ॥ पंचदशाः षोडशेषुश्रयध्वं ॥ षोडशाःसप्तदशेषुश्रय

प०

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वं ॥ सप्तदशाअष्टादशेषुश्रयध्वं ॥ अष्टादशाएकोनविं शेषुश्र
यध्वं ॥ एकोनविंशाविंशेषुश्रयध्वं ॥विंशाएकविंशेषुश्रयध्वं॥
एकविंशाद्वाविंशेषुश्रयध्वं ॥ द्वाविंशास्त्रयोविंशेषुश्रय
ध्वं ॥ त्रयोविंशाश्चतुर्विंशेषुश्रयध्वं ॥ चतुर्विंशाःपंचवि
शेषुश्रयध्वं ॥ पंचविंशाःषडिंशेषुश्रयध्वं ॥ षडिंशाः स
प्तविंशेषुश्रयध्वं ॥ सप्तविंशाअष्टाविंशेषुश्रयध्वं॥ अष्टाविंशा
एकोनत्रिंशेषुश्रयध्वं ॥ एकोनविंशास्त्रिंशेषुश्रयध्वं ॥ त्रिंशा
एकत्रिंशेषुश्रयध्वं ॥ एकत्रिंशाद्वात्रिंशेषुश्रयध्वं ॥ द्वात्रिं
शास्त्रयस्त्रिंशेषुश्रयध्वं ॥ देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिंशाः ॥
उत्तरेभवत ॥उत्तरश्चत्मानउत्तरसत्वानः ॥ यत्कामइदंजुहोमि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
१३

तन्मेसमृध्यतां ॥ वयं स्यामपतयोरयीणां ॥ ॐभूर्भुवःस्वः स्वाहा
अस्त्रायफट्॥ ॐहिरण्यगर्भः समवर्ततग्रे भूतस्यजातःपतिरेकआ
सीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ यः
प्राणतोनिमिषतोमहित्वैकइद्राजगतोबभूव ॥ यइशेअस्यद्विपदश्च
तुष्पदःकस्मैदेवायहविषाविधम ॥ ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्वि
सीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयो
निमसतश्चविवः ॥ महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां ॥ पिपृ
तांनोभरीमाभिः ॥ उपश्वासयपृथिवीमुतद्यं पुरुत्रात्वेमनुतांवेष्टितं
जगत् ॥ सदुंदुभेसदूरिंद्रे णदेवैर्दूराद्ववायोअपसेधशत्रून् ॥ अग्न

प्र०

१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जु
हुराणमयोभूयिष्ठांतेनमउक्तिंविधेम ॥ यांतअग्नेयज्ञियांतनूस्तयेद्वा
रोहात्मान्मानंअछावसुनिकृण्वंनन्मेनयांपुरूणियज्ञोभूत्वायज्ञंमासि
दिस्वांयोनिं ॥ जातवेदोभुवआजायमानःसक्षय एहि ॥ इमंयमप्र
स्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः ॥ आत्वामंत्राकविश
स्तावहंत्वेनाराजन्हविष्मामादयस्व ॥ उरसाशिरसादृष्ट्यावच
सामनसातथा ॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगउच्य
ते ॥ प्रजननेब्रह्मातिष्ठतु ॥ पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयो
र्हरस्तिष्ठतु ॥ बाव्होरिंद्रस्तिष्ठतु ॥ जठरेअग्निस्तिष्ठतु ॥ हृद
येशिवास्तिष्ठतु ॥ कंठेवसवस्तिष्ठंतु ॥ वक्त्रेसरस्वतीतिष्ठतु॥ ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म० १४

सिकयोर्वायुस्तिष्ठतु ॥ नयनयोःसूर्याचंद्रमसौतिष्ठेतां ॥ कर्णयोर
श्विनौदेवौतिष्ठेतां ॥ ललाटेरुद्रास्तिष्ठंतु ॥ मूर्ध्यादित्यास्तिष्ठंतु ॥
शिरसिमहादेवास्तिष्ठतु ॥ शिखायांचामुंडातिष्ठतु ॥ पृष्ठेपिन
कीतिष्ठतु ॥ पुरतःशूलीतिष्ठतु ॥ पार्श्वयोःशिवाशंकरौतिष्ठ
तां ॥ सर्वतोवायुस्तिष्ठतु ॥ ततोबाहिःसर्वतोग्निर्ज्वालामाला
परिवृतास्तिष्ठंतु ॥ सर्वेष्वंगेषुसर्वादेवतायथायथास्थानानिति
ष्ठंतु ॥ मा ँ रक्षंतु ॥ यजमानरक्षंतु ँ॥अग्निर्मेवाचिश्रितः ॥ वा
ँ हृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ वायुर्मे
प्राणेश्रितः ॥ प्राणोहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतं
ब्रह्मणि ॥ सूर्योमेचक्षुषिश्रितः ॥ चक्षुर्हृदये ॥ हृदयंमयि ॥

प्र० १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहममृते ॥ अमृतंब्रह्मणि ॥ चंद्रमामेमनसिश्रितः ॥ मनोहृद
ये ॥ हृदयंमायि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ दिशोमेश्रोत्रे
श्रिताः ॥ श्रोत्र ॥ हृदये ॥ ॥ हृदयंमायि ॥ अहममृते
अमृतंब्रह्मणि ॥ आपोमे रेतसिश्रितः ॥ रेतोहृदये ॥ हृदयंमायि॥
अहममृते ॥ अमृतंब्रह्मणि ॥ पृथ्वीमेशरीरेश्रितः ॥ शरीर हृद
ये ॥ हृदयंमायि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ ओषधिवनस्प
तयामेलोमसुश्रिताः" लोमानिहृदये ॥ हृदयंमायि ॥ अहममृते ॥
अमृतंब्रह्मणि ॥ इंद्रो मेबले श्रितः ॥ बल हृदये ॥ हृदयमायि ॥
अहममृते ॥ अमृतंब्रह्मणि ॥ पर्जन्यो मेमूर्ध्निश्रितः ॥ मूर्धाहृदये
॥ हृदयमायि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ ईशानोमेमन्यौश्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०
१६

तः मन्युर्हृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ आ
त्मामआत्मनिश्रितः ॥ आत्माहृदये हृदयंमयि ॥ अहममृते ॥
अमृतंब्रह्मणि ॥ पुनर्मआत्मापुनरायुरागात् ॥ पुनःप्राणः पुनरा
कूतमागात् ॥ वैश्वानरोरश्मिभिर्वावृधानः ॥ अंतस्तिष्ठत्वमृतस्य
गोपाः ॥ सर्वेष्वंगेषुसर्वादेवतायथायथास्थानानितिष्ठंतु ॥ माꣳर
क्षंतु ॥ यजमानꣳरक्षतु ॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं ॥
गंगाधरंदशभुजंसर्वाभरणभूषितं ॥ नीलग्रीवंशशांकांकंनागयज्ञोप
वीतिनं ॥ व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदं ॥ कमंडल्वक्षसूत्रा
भ्यामन्वितंशूलपाणिनं ॥ ज्वलंतंपिंगलजटाशिखामुद्योतकारिणं॥
अमृतेनाप्लुतंहृष्टमुमादेहार्धधारिणं ॥दिव्यसिंहासमासीनंदिव्यभोग

प्र०

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समन्वितं॥दिग्देवतासमायुक्तंसुरासुरनमस्कृतं॥ नित्यंचशाश्वतंशुद्धं
ध्रुवमक्षरमव्ययं॥ सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणं ॥ एवंध्या
त्वाद्विजःसम्यक्ततोयजनमारभेत् ॥ आराधितोमनुष्यैस्त्वं सि
द्धैर्देवासुरादिभिः ॥ आराधयामिभक्त्यात्वांमांगृहाणमहेश्वर ॥
आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैःसहकेतुमद्भिर्वातजलैर्बलवद्भिर्म
नोजवैरायाहिशीघ्रंममहव्यायशर्वाम् ॥ स्वामिन्सर्वजगन्नाथयाव
त्पूजावसानकं ॥ तावत्त्वंप्रीतिभावेनलिंगेस्मिन्सन्निधोभव ॥ इति
महान्यासः समाप्तः ॥ ॥ ॥ ॥ ॥

मुंबईत—हेपुस्तक आर्यसेवक छापखान्यांत रंगोविनायक जाम
खेडकर व पुरुषोत्तमदास सुगंधी नाशीककर यांनीं छापविलें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति महा० स० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति पुरुषसूक्तं समाप्तं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विप्रासोविपन्यवोजागृवांसःसमिंधत ॥ विष्णोर्यत्परमंपदं ॥
॥ ४ ॥ ॥ इतिपुरुषसूक्तंसमाप्तं ॥ ॥

मुंबईतः—हें पुस्तक 'नेटिव ओपिनियन' छापखान्यांत
रंगो विनायक जामखेडकर व पुरुषोत्तमदास
सुगंधी नाशिककर यांणिं छापविलें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ॥ पशूँस्तांश्चक्रे वायव्यानारण्या
न्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छं
दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाऽजायंत ये के
चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः
॥ २ ॥ यत्पुरुषं व्यदधुः कति धा व्यकल्पयन् ॥ मुखं किमस्य
कौ बाहू काऽउरू पादाऽउच्येते ॥ ब्राह्मणोस्य मुखमासीद्बाहूराजन्यः
कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत ॥ चंद्रमा
मनसो जातश्चक्षोः सूर्योऽअजायत ॥ मुखादिंद्रश्चाग्निश्च प्राणाद्वायु
रजायत ॥ नाभ्याऽआसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु॰ ॥ २ ॥

भूमिर्दिशः श्रोत्राच्चथा लोकाँऽअकल्पयन् ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवा यद्यज्ञं तन्वानाऽअबध्नन्पुरुषं पशुं ॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥ ३ ॥ अतो देवाऽअवंतु नो यतो विष्णुर्विचक्रमे ॥ पृथिव्याः सप्तधामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूळ्हमस्य पांसुरे ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः ॥ अतो धर्माणि धारयन् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इंद्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥ त

सू॰ ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रशीर्षापुरुषःसहस्रा सू.
त्वात्यतिष्ठद्दशांगुलं ॥ पुरु
मृतत्वस्येशानोयदन्नेनातिरोह
भाहमातोज्या ॥ पादोस्यविश्वा
भूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभ
वत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्मा
द्विराळजायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतप
श्चाद्भूमिमथोपुरः ॥ १ ॥ यत्पुरुषेणहविषादेवायज्ञम
संतोऽअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ॥ तंयज्ञबर्हि
न्पुरुषंजातमग्रतः ॥ तेनदेवाऽअयजंतसाध्याऋषयश्चये ॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु॰

॥ २ ॥

भूमिर्दिशः श्रोत्रात्तथा लोकाँऽअकल्पयन् ॥ सप्तास्यासन्परिधयः
स्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञं तन्वानाऽअबध्नन्पुरुषं पशुं
॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकं
महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥ ३ ॥ अतो देवाऽअ
वंतु नो यतो विष्णुर्विचक्रमे ॥ पृथिव्याः सप्त धामभिः ॥ इदं वि
ष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूळ्हमस्य पांसुरे ॥ त्रीणि पदा
विचक्रमे विष्णुर्गोपाऽअदाभ्यः ॥ अतो धर्माणि धारयन् ॥ वि
ष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इंद्रस्य युज्यः सखा ॥
तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥ त॰

सू॰

॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=14.07.20 11:59
,TRANSFERRED=2020/07/14 at 12:13:37
,PAGES=144
,TYPE=STD
,NAME=S0003310
,Book Name=M-2518-PAVMAN PANCH SUKT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection